# शतकसप्तकम्

## (संस्कृतानुवादः)

अनुवादकः

**ति० गु० वरदाचार्यः**, यम्. ए. (आनर्स्)
श्रीनारसिंहसंस्कृतकलाशालायाः
आन्ध्रजातीयकलाशालायाश्च भूतपूर्वाध्यक्षः
(चिट्टिगूडूर्, मछलीपत्तनम्)

**आन्ध्रप्रदेश साहित्य अकाडेमी संस्थया प्रकाशितम्**
**राबाद–आं. प्र.**

१९६३

रु. १-५०

S
891.482
V 42 S
V 42 S

# शतकसप्तकम्

(संस्कृतानुवादः)

अनुवादकः

ति० गु० वरदाचार्यः, यम्. ए. (आनर्स्)

श्रीनारसिंहसंस्कृतकलाशालायाः

आन्ध्रजातीयकलाशालायाश्च भूतपूर्वाध्यक्षः

(चिट्टिगूडूरु, मछलीपत्तनम्)

COMPLIMENTARY COPY

आन्ध्रप्रदेश साहित्य अकाडेमी संस्थया प्रकाशितम्

हैदराबाद – आं. प्र.

१९६३

रु. १-५०

प्रथममुद्रणम्
१०००

73

Library IIAS, Shimla
S 891.482 V 42 S
00032328

S
891.482
V42S

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 32328
Date 18.8.69

अजन्ता प्रिण्टर्स
सिकन्दराबाद

# उपोद्घातः

आन्ध्रसाहित्यप्रपञ्चे "शतक" विभागः अतिविशिष्टं स्थानमाक्रमते। पण्डितान्, पामरान्, बालांश्च समं रञ्जयत्ययं विभागः।

शतकग्रन्थाः न कथाप्रधानाः, नापि वर्णनप्रधानाः, नचापि संगीतप्रधानाः। अपितु विविधभावप्रधानाः। शतकानि प्रायो मुक्तकानि भवन्ति। तथाऽप्येकसूत्रतामधियन्ति। संस्कृतपदबहुलान्यप्यान्ध्रशतकानि सर्वजनसुगमानि विराजन्ते। प्रायः शतकग्रन्थेषु कवेरात्मानुभूतिः प्रस्फुटीभवति।

आन्ध्रभाषानिबद्धानि शतकानि मुद्रितामुद्रितानि त्रिसहस्राधिकान्युपलभ्यन्ते। इयं शतकरचनप्रक्रिया क्रिस्तुशकस्य द्वादशतमशतकादेव कविभिराश्रिता। कस्यामप्यन्यभारतीयभाषायामान्ध्रभाषायामिवैतादृशाधिकसंख्याकाः शतकग्रन्था न निर्मिताः नापि प्रचारपथमधिगताश्च परिदृश्यन्ते। आन्ध्रशतकानि बहुधा स्वतन्त्राण्येव। संस्कृतादनूदितानि कतिचनैव सन्ति।

शतकग्रन्थेषु संख्या, मकुट, वृत्तनियमास्सन्ति। किञ्चिदधिकशतं वा शतं वा पद्यानि स्युः। प्रतिपद्यमन्ते मकुटमेकमेव सम्बुध्यन्तम् भवति। प्रतिशतकमेकरूपमेव वृत्तं रसश्चैक एवोपनिबध्यन्ते। प्रतिशतकं मकुटस्यैकत्वादेकविधमेव वृत्तमप्यनुग्रध्यते। एतादृशं वैशिष्ट्यमन्यत्र वाङ्मयविभागे नोपलभ्यते। प्रायो भावप्रधानाः, स्तुतिरूपाः, भक्तिशृङ्गारवीरादिरसपरिपुष्टाश्च शतकग्रन्था विराजन्ते।

ग्रन्थेऽस्मिन्नान्ध्रभाषायां विविधकविभिर्निर्मितानि सप्त शतकानि संस्कृतेऽनूदितानि सन्ति। तत्र प्रथमस्य सुमतिशतकस्य निर्मातुर्नाम नोपलभ्यते। तत्तु नीतिबोधात्मकं शतकम्। हृदयस्पृशं सर्वजनोपगांच नीतिं कविरस्मिन्नुपनिबबन्ध। द्वितीयं भास्करककिकृतं भास्करशतकमपि प्राय

एवंविध एव । श्रीकालहस्तीश्वर, श्रीदाशरथि, श्रीकृष्ण, श्री नरसिंहशतकानि भगवत्स्तुतिरूपाणि । वेमननाम्ना महायोगिना कविपुंगवेन अतिरुचिरं नीतिबोधकं स्वनाम्नैव शतकमुपनिबद्धमत्यन्तजनप्रियं भासते ।

तदेतादृशमतिरमणीयं शतकसप्तकं ललितललितया, सर्वजनसुगमया देववाण्या सुगृहीतनामभिः विद्वद्वरैः श्रीमद्भिः ति-गु-वरदाचार्यवर्यैः आन्ध्रेतरविद्वदनुजिघृक्षयाऽनूदितं स्वतन्त्रग्रन्थ इव भासते । यत्रतत्र मूलकृतिषु संस्कृतमयान्येर पद्यान्यनुवादानपेक्षाणि परिदृश्यन्ते तानि तथैव संस्कृत शतकेऽपि संगृह्य आन्ध्रेतरेभ्यः आन्ध्रवृत्तपरिचयोऽपि दत्तः श्रीमद्भिः वरदाचार्यपादैः । ग्रन्थोऽयं महतां महोपकाराय कल्पते इति सुदृढं समूहितुं शकयते । एवमेवान्यान्यप्यान्ध्रशतकानि श्रीमन्तः आचार्यवर्याः संस्कृतेऽनूद्य आन्ध्रशतकानां विश्वविश्वख्यातिं समापादयन्त्वित्याशास्मि ।

आन्ध्रप्रदेश साहित्य अकाडेमी अधिनेतारश्च संस्कृतविदुषां सुवहु माननीया भवन्ति यदेतादृशसंस्कृतग्रन्थकर्तृभ्यः प्रोत्सानं दत्वा बहूनां संस्कृतानुवादानां, स्वतन्त्रसंस्कृतरचनानां च प्रकाशने नान्दीरूपतयाऽस्य पुस्तकस्य प्रकाशनं चक्रुरिति ।

परमरमणीयोऽयमनूदितग्रन्थ इत्यत्र पठितारो विद्वांस एव प्रमाणं भवन्तीति विरमामि ।

इत्थं निवेदकः

**कप्पगन्तुल लक्ष्मणशास्त्री**

सदस्यः

**आन्ध्र प्रदेश साहित्य अकाडेमी**

हैदराबाद
१५-५-१९६४

# अनुक्रमणिका


| | | |
|---|---|---|
| सुमतिशतकम् | ... | 1 |
| भास्करशतकम् | ... | 13 |
| श्रीकालहस्तीश्वरशतकम् | ... | 35 |
| श्रीदाशरथिशतकम् | ... | 59 |
| वेमनशतकम् | ... | 80 |
| श्रीकृष्णशतकम् | ... | 92 |
| श्रीनरसिंहशतकम् | ... | 104 |

# सुमतिशतकम्

श्रीहयग्रीवाय नमः

# सुमतिशतकम्

अविदिताह्वयकेन मनीषिणा कृतिरियं कृतिनान्ध्रागिरीरिता ।
तदनुवादमिमं शतकात्मकं सहृदयाः शृणुतादरणोचितम् ॥

श्रीरामस्य दयाहेतोः साधु साध्विति साधुषु ।
वदत्सु हारिणः पथ्यान् ब्रवीमि सुमते नयान् ॥ १

आपद्यसाह्यकृद्बन्धुः वरादायी सुरोऽर्चितः ।
युध्यारूढोऽचलन्नश्वः त्यक्तव्यास्सुमते द्रुतम् ॥ २

अपि जीवेत्सुखं क्षेत्रं कृषञ्जवयुतैर्वृषैः ।
नत्वर्थितमदातारं सुमते स्वामिनं भजन् ॥ ३

मा कार्षीः सेवनं लुब्धः प्रणयं कुजनैः समम् ।
देवालयाधिकारं च सञ्चारं सुमते वने ॥ ४

विरलस्फुरितोष्ठो यो मधुरालापवर्जितः ।
अधिकारगदग्रस्तः स मूकः सुमते शवः ॥ ५

ऋणाद्रोगस्तपोऽज्ञस्य वृद्धस्य तरुणी प्रिया ।
अविवेकिप्रभो राज्यं सुमतेऽनर्थहेतवः ॥ ६

ऋणदाताऽगदङ्कारो नदी नित्यजला द्विजः ।
यत्र तस्मिन्वस ग्रामे नो चेत्तं सुमते त्यज ॥ ७

जामातुः सौम्यता गोपपाण्डिती सत्यता स्त्रियः ।
तुषातस्तण्डुलाः श्वेताः काकास्स्युस्सुमते न हि ॥ ८

निर्विशङ्कं ददद्दाता, बुभुक्षोरोदनस्सुधा ।
धैर्यवान्वंशतिलकः, सुमते क्लेशभृत्पुमान् ॥ ९

बुभुक्षानपनुद् भुक्तिः कुलटात्वोपजीवनम् ।
जीर्णकूपजलं गर्ह्यमवीनां सुमते पयः ॥ १०

फलप्रदात्री विद्या हि रणोत्साहो हि पौरुषम् ।
काव्यास्वादो हि वैदग्ध्यं वादिता सुमते व्यथा ॥ ११

यन्मुखं न पठेत्सम्यगभ्वेत्यन्नं न याचते ।
नानुजांश्चाह्वयेत्तद्धि खातमृत् सुमते बिलम् ॥ १२

गोधा किं न शतायुः स्यात्, सहस्राब्दश्च पन्नगः ।
ह्रदे सुखी बकश्चापि, पुमर्थान्सुमते भज ॥ १३

न प्राप्यन्ते गुणा नीचैरुत्तमस्य कथञ्चन ।
पित्तलं किं भवेत्स्वर्णं सुमते यत्नविद्रुतम् ॥ १४

अश्वमम्भः पिबन्तं च, मत्तेभं च मदस्रुतम् ।
गोः समीपे वृषं, माभ्येह्यविद्यं सुमतेऽधमम् ॥ १५

उपकर्तारमुद्दिश्य नोपकारेऽस्त्यपूर्वता ।
उपकर्तापकर्तुस्तु सुमते सुजनो मतः ॥ १६

कपटं मधुरं पूर्वमिक्षुवद्दृश्यते जनैः ।
पौरोभाग्यान्निजं रूपं व्यनक्ति सुमतेऽन्ततः ॥ १७

यदा यदुचितं वाक्यं तत्तदोक्त्वा परान्न यः ।
क्लिश्नाति क्लिश्यते वापि स्वयं स सुमते कृती ॥ १८

रन्ध्रान्वेषपरं नित्यं नोपसर्पेत्कदाचन ।
मेकः फणिफणाच्छायां श्रयते सुमते किमु ॥ १९

आयान्ति सह सम्पद्भिः बान्धवा बहुला भुवि ।
जलपूर्णे सहस्राणि मेकास्स्युः सुमते ह्रदे ॥ २०

बन्धुनिन्दा न कर्तव्या, नापक्वफलसञ्चयः ।
पलायनं तथा युद्धे, धिक्कारः सुमते गुरोः ॥ २१

एकोऽधिकारी निर्णेता चैको ग्रामे भवेद्यदि ।
शुभं तत्र पदं धत्तेऽनर्थस्तु सुमतेऽन्यथा ॥ २२

नारागिणो जिहास्यन्ते जायास्वामिसुहृज्जनाः ।
येन *गोपः स एव स्यात् जात्या स सुमते न सः ॥ २३

उह्यते शकटो नावा शकटेन तथा च नौः ।
तयोरिव नृणां स्यातां सुमते ह्युच्चनीचते ॥ २४

योऽङ्गीकरोति युवतेः चिरं ज्ञातिकुले स्थितिम् ।
प्रेषयत्यापणं वृत्त्यै जारिण्याः सुमते स ताम् ॥ २५

---

* पाशुपत्यात् गोपो मूर्ख इतीरितः ।

शुभलग्नेऽभिषिक्तोऽपि हेमसिंहासने वरे ।
शुनकः किं विजह्यात्स्वं सुमते पूर्ववर्तनम् ॥ २६

मण्डूकस्यैकपादत्वं, रोगः सर्पस्य, वार्धके ।
दारिद्र्यं, कुलटा भार्या, सुमते दुःखहेतवः ॥ २७

जलजं सलिलाद्भ्रष्टं म्लानं स्यान्मित्ररश्मिभिः ।
स्थानच्युतस्य मित्राणि भवन्ति सुमतेऽरयः ॥ २८

*करणो मरणं गच्छेद्द्विश्वसन्करणान्तरम् ।
जिजीविषुः सजातीयं प्रतीयात्सुमते न सः ॥ २९

करणेन समं वैराज्जीर्यत्यन्नं न खादितम् ।
ब्रह्मणोऽस्नेहलिप्ताक्षो न धावेत्सुमते रथः ॥ ३०

करणः सुजनो, हस्ती मदहीनो, ऽदशन्नहिः ।
वृश्चिकोऽक्षतिकारी च न गण्याः सुमते भुवि ॥ ३१

अपक्वं स्यात्फलं दृष्टं कषायं मधुरं न तु ।
सतीषु तरुणीष्वीप्सन्नप्रौढाः सुमते पशुः ॥ ३२

अकवे रचना, स्त्रीणां रक्तिर्भाववियोजिता ।
शरो धावति कोले चाप्यसिद्धः सुमते वृथा ॥ ३३

न स्नेहो दुर्जनैः सार्धं न नाशः कीर्तिसम्पदः ।
न श्लाघ्यत्वमृणं दातुः न रागः सुमते स्त्रियः ॥ ३४

---

* करणो ग्रामलेखकः ।

अन्यभुक्तां स्त्रियं भोक्तुमिच्छन्नन्यविटः समः ।
पिपीलैरुपगच्छद्भिः पिष्टेक्षुं सुमते रसात् ॥ ३५

हासो निर्हेतुको व्यर्थो योषा चाधृतकञ्चुका ।
*पूरणेन विनापूपोऽप्यतौर्यः सुमते महः ॥ ३६

कुलस्त्रीषु न वैरं स्यात् न तासामपवादनम् ।
स्त्रियोऽश्रु पतितं गेहे क्षालयेत्सुमते श्रियम् ॥ ३७

काले स्नेहमये दोषो गुणकक्षां विगाहते ।
वैपरीत्ये गुणस्यापि दोषता सुमते भवेत् ॥ ३८

ध्रुवं नीचनरस्नेहादनर्थः प्रभवेद् भुवि ।
मञ्चो मत्कुणदंशाद्धि निन्द्यतां सुमते व्रजेत् ॥ ३९

कामशास्त्रविनिष्णातो राजेन्दुः सुन्दरोऽपि सन् ।
पण्याङ्गनां विना पण्यं लभते सुमते कथम् ॥ ४०

सञ्जातस्तनयो व्यर्थः सर्वान्हन्ति गुरोर्गुणान् ।
माधुर्यं मञ्जरीवेक्षोः सकलं सुमते शृणु ॥ ४१

स्त्रीविश्वासः फणिस्नेहश्चान्यकान्तानुरक्तता ।
मिथ्या निम्बस्य माधुर्यं नृपाणां सुमते वचः ॥ ४२

अर्जितारं पतिं योषा मानयत्युपचारतः ।
मन्यते तु दरिद्रं तं जङ्गमं सुमते शवम् ॥ ४३

---

*अपूपान्तस्स्थितः पदार्थः ।

मानुशोचीरतीतं त्वं मा श्रद्धाः कामिनीरतिम् ।
मावरोधजनैर्गुप्तं भाषणं सुमते कृथाः ॥ ४४

पिपीलनिर्मिता यान्ति वल्मीकाः फणिनां वशम् ।
तथाज्ञैस्सञ्चितं वित्तं सुमते नृपसाद्भवेत् ॥ ४५

अवन्धुं धनिनं वन्धुं श्रयन्त्युक्त्वा नरा इह ।
अधनोऽवन्धुवद्बन्धुः वर्ज्यते सुमते नरैः ॥ ४६

हस्तयोर्भूषणं दानं भूभृतां सत्यभाषणम् ।
पातिव्रत्यं तथा स्त्रीणां सर्वेषां सुमते नयः ॥ ४७

कालात्ययं तनूतापं नासहिष्णोः फलोदयः ।
सोढक्लेशविलम्वेन सुमते नष्टमाप्यते ॥ ४८

कोप एव स्वकीयोऽरिः, शान्ती रक्षा, तथा दया ।
बन्धुः, तुष्टिर्भवेत्स्वर्गो निरयस्सुमते व्यथा ॥ ४९

तपस्स्वीयं, सतीरूपं, वैदुष्यं तनयस्य च ।
ओषधिः प्राङ्गणस्था च, न स्तुत्याः सुमते जनैः ॥ ५०

स्वसम्पन्मघवद्भोगः, स्वदुःखं स्वर्दरिद्रता ।
स्वमृत्युर्जगतामन्तः, स्वप्रिया सुमतेऽप्सराः ॥ ५१

देशे विरहिते स्वीयैः निस्स्नेहे कलहाकुले ।
संशयस्यास्पदे वापि न स्थेयं सुमते जनैः ॥ ५२

अताम्बूलं मुखं, गात्रमघृष्टतरुणीस्तनम् ।
पद्महीनो ह्रदो, रात्रिः निश्चन्द्रा सुमते वृथा ॥ ५३

विषं स्यात्फणिनो मूर्ध्नि पुच्छाग्रे वृश्चिकस्य च ।
आचूडपादं सर्वत्र खलस्य सुमते विषम् ॥ ५४

दत्तेऽप्यर्थे शिरोदघ्ने गणिकाया न सत्यता ।
शिरसा शपमानां तां प्रतीयात्सुमते न हि ॥ ५५

अकृत्तकेशं चास्नातं मलोपहतवाससम् ।
अपि प्रियं जुगुप्सन्ते सुमतेऽपि कुलाङ्गनाः ॥ ५६

आत्मनानुपभुक्तोऽर्थो भूपतिं च भुवं व्रजेत् ।
मक्षिकासञ्चितं ह्येति सुमतेऽन्यवशं मधु ॥ ५७

नृपः कर्णेजपामात्यवाग्भिर्यो बाधते प्रजाः ।
स दिधक्षति कल्पद्रुं सुमते क्षारकारणात् ॥ ५८

धनदेऽपि सुहृद्वर्ये भैक्षचर्यैव धूर्जटेः ।
स्वीयानां विभवेऽनल्पे स्वभाग्यं सुमते स्वकम् ॥ ५९

करोत्युपकृतो धीरः शतावृत्तं प्रतिप्रियम् ।
दत्ते क्षाराम्बुसंसिक्तो लाङ्गली सुमते सुधाम् ॥ ६०

न पन्थानं व्रजेदेको नाद्याच्छत्रुगृहे रसात् ।
नाददीत परस्वं च नाप्रियं सुमते भजेत् ॥ ६१

करग्राहो द्यूतकरः स्वर्णकारः पणाङ्गना ।
वामहस्तः पणाजीवः श्रद्धेयाः सुमते न हि ॥ ६२

न पाययेत्पयः साम्ना विषं दण्डात्तु भोजयेत् ।
दुर्बलं साम, दण्डस्तु प्रबलः सुमते ध्रुवम् ॥ ६३

निर्मर्यादो महीजानिः विधवा गृहनायिका ।
करणो वैदिकश्चापि सुमते मृत्युदेवता ॥ ६४

रसवत्कवितागोष्ठी श्राव्यगानं च सन्निधौ ।
अज्ञस्य बधिरस्येव सुमते शङ्खनादनम् ॥ ६५

सभायां न हसेत्पित्रोः सन्निधौ च महीक्षितः ।
परसत्या न हासः स्यात्, न हसेत् सुमते द्विजम् ॥ ६६

जीवितस्य जलं मूलं मुखं च रसवद्गिराम् ।
नारी भूषा नराणां च नारीणां सुमतेऽम्बरम् ॥ ६७

न केनापि भवेद्वैरं नानुशोचेद्दरिद्रताम् ।
न गोष्ठ्यां परुषं भाष्यं स्त्रीलौल्यं सुमते त्यज ॥ ६८

रिक्तहस्तेन नोपेयाद्दैवतं भूपतिं गुरुम् ।
प्रेयसीं तनयं धीमानवेप्सुः सुमते शुभम् ॥ ६९

कार्ये दासी रतौ रम्भा सचिवा मन्त्रणेष्वपि ।
पोषणे जननी चापि पुंसः स्यात्सुमते सती ॥ ७०

सोदरः परनारीणां तुष्टः परहिते रतः ।
स्तुतिनिन्दासमो यस्स सुमते पुरुषोत्तमः ॥ ७१

मा रज्यस्व परस्त्रीषु परस्वानि च मा गृधः ।
मा परानपभाषस्व मार्थ्यतां सुमतेऽधमः ॥ ७२

भीष्मोऽप्यन्यसतीगोष्ठ्या भुवि निन्दां प्रपद्यते ।
तथैवास्त्यपतौ वासात्सुमते शीलवत्यपि ॥ ७३

जहाह्यन्यहृदं भार्यां मा प्रतीपं सुतं भज ।
अविधेयं भटं माऽऽदाः स्त्रीलौल्यं सुमते जहि ॥ ७४

माविष्कार्षीर्मतिं स्वीयां मा गमोऽन्यं निरर्थकम् ।
मा रंसीः परदारान्मा दस्राश्वं सुमते भज ॥ ७५

भार्यां पर्वसु नोपेयान्न हृष्येद्दयया प्रभोः ।
न लालयेत्कलत्रं च, न तिष्ठेत्सुमतेऽपदे ॥ ७६

धौतदन्तस्य ताम्बूलं, मानिन्या सह सङ्गमः ।
अभ्यक्तस्नातसुप्तिश्च, सुमते वर्णनातिगाः ॥ ७७

सेवाऽक्लेशविदः पत्युः, मुग्धाया योषितो रतिः ।
आर्यताभञ्जकः स्नेहः प्रतीपं सुमते प्लुतम् ॥ ७८

सलिलं क्षीरसम्मिश्रं क्षीरवद्भासते वहिः ।
भञ्जयेत्तु रसं तस्य तथैव सुमते खलः ॥ ७९

न कदाप्युपकुर्वीत दुष्टमापद्वशं गतम् ।
वृश्चिको रक्षितोऽप्यग्नेः न दशेत्सुमते किमु ॥ ८०

पत्तनस्य वणिक्प्राणाः कलमस्य जलं तथा ।
करिणश्च करो, योषा सम्पदः सुमते भुवि ॥ ८१

ददद्व्याघ्रपयः, छित्त्वा हृदयं चार्पयन्करे ।
यच्छन्भूरि धनं, वेश्यां सुमते नैव रञ्जयेत् ॥ ८२

आयान्त्येवाटवीमध्यं सर्वार्थाः सुमुखे विधौ ।
मेरावपि न लभ्यास्ते सुमते विमुखे विधौ ॥ ८३

अयाचितचिकीर्षुत्वमरक्ततरुणीरतिः ।
वर्ज्या किम्भूपसेवा च, सुमतेऽनार्यसङ्गतिः ॥ ८४

प्रातिवेश्ये नरे शत्रौ, व्यवहारचणे प्रभौ ।
कृषिके पिशुने, नाशः सुमते करणस्य हि ॥ ८५

स्वर्णदानादृणं माऽदाः, मा पलायस्व सङ्गरे ।
मा क्रीतार्थमृणं वादीः मा सख्यं सुमतेऽसता ॥ ८६

किं मे बलवतश्छिन्नमिति मा बहुरिर्भव ।
पिपीलिकावशं प्राप्तो म्रियते सुमते फणी ॥ ८७

सचिवेन विनाभूतो भूजानिः सदृशो ध्रुवम् ।
शुण्डादण्डविहीनेन करिणा सुमते शृणु ॥ ८८

सामात्यं भूभृतो राज्यं मन्त्रगुप्तेः स्थिरं भवेत् ।
यथाङ्गविकलं यन्त्रं सुमतेऽन्यत्तु सीदति ॥ ८९

जीवितं वचसस्सत्यं, राजदुर्गस्य रक्षिणः ।
स्त्रियो मानः, स्वहस्तश्च लेखस्य, सुमते भुवि ॥ ९०

मानी वीतधृतिर्नीचमाश्रयन्दृश्यते भुवि ।
प्रस्थमात्रे जले गूहन् सुमते स्वमिव द्विपः ॥ ९१

अनादरवतो राज्ञो भुक्तिमुक्ती न सेवया ।
नष्टदीपद्युतौ गेहे सुमते रतिविभ्रमाः ॥ ९२

पूर्वोक्तं नान्यथाकुर्यान्न सुहृद्यशिवं वदेत् ।
न सेवेत नृपं चण्डं न दुष्टं सुमते भजेत् ॥ ९३

शारीरकबलोपेतान्नीतिमान् बलवत्तरः ।
आधोरणो नयेन्नागं शैलाभं सुमते वशम् ॥ ९४

अनूपं न कृषेद्देशं, न गच्छेद्बन्धुमापदि ।
नान्यं ब्रूयात्स्वकं छिद्रं, न भीरोः सुमते रणः ॥ ९५

असस्योऽस्वामिको ग्रामो, मार्गोऽनुचरवर्जितः ।
देशो भूपविहीनश्च, सुमते रुद्रभूसमाः ॥ ९६

अमान्मथविकारां यो रिरंसेत बलात् स्त्रियम् ।
स जलेन विना गन्धान्सुमते पेष्टुमिच्छति ॥ ९७

श्रोतव्यं सर्वतो मर्त्याच्छ्रुतं सम्यग्विचारयेत् ।
सत्यासत्ये ततो जानन् कथ्यते सुमते सुधीः ॥ ९८

अनास्वादितताम्बूलमपीतललनाधरम् ।
अगाननिपुणं चास्यं भस्रदं सुमते बिलम् ॥ ९९

वेश्यायाः प्रणयो न स्यात्सम्भूतोऽपि न च स्थिरः ।
न रोहति तृणं मार्गे विनश्येत्सुमते भवत् ॥ १००

वाराङ्गनायाश्शपथः, स्वर्णकारस्य सौहृदम् ।
विभवः स्वप्ननिर्विष्टः, श्रद्धेयः सुमते न हि ॥ १०१

अकल्याणकरी विद्या, गीतं चारसचर्वणम् ।
अनुत्साहा सभा व्यर्था चासभ्यं सुमते वचः ॥ १०२

कलहाय परीहासो, दुःखाय सुखसन्ततिः ।
हासाय च भवेद्वृद्धिः, पातोऽर्घे सुमते वृधे ॥ १०३

कृतघ्नः स्वर्णकारश्च चण्डालो नापितस्तथा ।
प्रियो यस्य प्रभो राज्यं सुमते तस्य नश्यति ॥ १०४

मा भूत्स्त्रीष्वपवादस्ते, मा सख्यं कुरु बालकैः ।
आदेया गुणिता, हेया सुमते स्वामिगर्हणा ॥ १०५

आयात्येव स्वयं सम्पन्नारिकेलजलं यथा ।
अपैति करिणा जग्धं कपित्थं सुमते यथा ॥ १०६

अन्यासक्तां स्त्रियं मूढस्ताम्यतीप्सन्मुधा विटः ।
किं बिडालवशश्चारु संल्पेत्सुमते शुकः ॥ १०७

जन्ममात्रान्न तावन्तं पिता पुत्रस्य विन्दति ।
हर्षं तस्य गुणाधिक्याद्यावन्तं सुमते भुवि ॥ १०८

जायतामन्वये नीचे, मास्तु कार्येषु दक्षता ।
दासीपुत्रो भवेद्वापि, सम्पन्नः सुमते प्रभुः ॥ १०९

# भास्करशतकम्

# भास्करशतकम्

श्रीमन्तं विगुणं जनाः कृतधियोऽप्यत्यादृता यत्नतो
दूरायातपरिश्रमं गुरुतमं सोढ्वाश्रयन्ते स्वयम् ।
वाहिन्यो मधुरोदकाः कथमपि क्षाराम्बुधिं यन्ति यत्
तद्रत्नाकरताकृतं न किमु तस्यास्सद्गुरो भास्कर ॥ १

विश्वस्यान्न कदापि यौवतजनं कापट्यदोषास्पदं
भूयिष्ठं पुरुषं बलेन च गुणैर्दूरे चरन्तं च सः ।
मायाभिर्यतते वशं गमयितुं; सारङ्गधारं पुरा
चित्राङ्गी विनिकृत्तपाणिचरणं मोघाऽकरोद्भास्कर ॥ २

अन्योन्यं यदि बान्धवा विदधतस्साह्यं यथापेक्षितं
विन्दन्ते फलमीप्सितं सुसदृशं बान्धव्यभावस्य तत् ।
उह्यन्ते शकटैः स्थले तरणयो निश्चेतनैरप्यहो
तादृग्भिः शकटा जले तरणिभिश्चास्सद्गुरो भास्कर ॥ ३

यद्यर्चन्ति जनास्सदा न कृपणाः कामान्वितीर्यार्थिनः
शक्तावप्यकृतार्थमर्थनिचयं तेभ्यो विधिस्संहरेत् ।
यद्वत्साः प्रतिबद्धपानतृषिताः हम्भारवं कुर्वते
गावस्ताः चरणाहतिं न तु पयो दद्युर्गुरो भास्कर ॥ ४

लुब्धो नीचगुणो धनैर्विरहितो युक्तोऽपि वा तान्यहो
आतृप्तेर्न हि भोक्तुमिच्छति कदाप्येषां प्ररक्षन् स्थितिम् ।
मूढोऽयं क्षयितां न वेत्ति धनसंपत्तेः शरीरस्य चा-
प्युत्कूलानि नदीजलानि शुनको लेढ्येव हे भास्कर ॥ ५

यो भूपो बहुधोपकारकरणैः काले प्रजा रञ्जयेत्
तस्मै ता वितरेयुरेव सकलं भक्त्यादराभ्यां निजम् ।
निष्कृष्टुं स धनं यदीच्छति ततो मूलस्य भङ्गो भवेत्
दोहाद्गोस्सुलभं पयो हि न पुनः छिन्नोधसो भास्कर ॥ ६

संपर्काद्विगुणस्य भाषणवशादाकर्णनाच्चान्ततः
प्राप्नोत्येव विचक्षणोऽपि महतोऽनर्थानवज्ञामपि ।
नैकट्यात्फलिनस्तरुर्हि निपतेत्कूलङ्कषस्रोतसः
संबन्धादयसोऽह्ययोघनहतेः पात्रं शिखी भास्कर ॥ ७

प्रेम्णा चादरतश्च मित्रमणिना स्वल्पं प्रदत्तं महत्
मन्वानो गुणवान्प्रतिप्रियकृतौ पर्युत्सुकस्स्यात्कृती ।
किं वा नाकृत देवकीसुतमणिर्मित्रे कुचेले पुरा
स्वस्मै योऽदित मुष्टिमात्रपृथुकं प्रेम्णा गुरो भास्कर ॥ ८

नैपुण्येन धरेश्वरो यदि सदा व्यापारयुक्तो भवेत्
तद्भृत्या अतिमात्रमप्यचतुरा निर्वर्तयेयुः कृतीः ।
लोकैकाधिपतेः रघूत्तमनृपस्याज्ञाकरा वानराः
सेतुं निर्ममिरे प्रतेरुरुदधिं जघ्नुर्द्विषो भास्कर ॥ ९

अन्धो देहबलातिरेकवशतो दृप्तोऽवमानी सतां
साधून्प्रक्रमते यदि व्यथयितुं सीदेत्स्वयं दुर्गतः ।
दैत्येन्द्रो हि हिरण्यपूर्वकशिपुः सूनुं गुणाढ्यं पुरा-
प्रह्लादं बहुधा विहिंस्य निहतः श्रीविष्णुना भास्कर ॥ १०

अत्यर्थं कुशलः कलास्वपि जनश्चातुर्यकोटिः परा
प्यालम्बं नियमेन वाञ्छति परं स्वश्रेयसस्साधकम् ।
सुश्लिष्टं न हि कङ्कणं सुविमलस्वर्णेन निष्पादितं
साहाय्यं यदि टङ्कणस्य न भवेदसद्गुरो भास्कर ॥ ११

अर्थाकाङ्क्षणया धरातलगतास्सर्वेऽपि ये मानवाः
गोप्तारं सुजनं स्वकीयनृपतिं वाञ्छन्ति पर्युत्सुकाः ।
उद्यन्तं शशिनं चकोरततयो ज्योत्स्नामुपादित्सवः
प्रत्युद्यन्ति हि वीक्षितुं प्रमुदिता अस्मद्गुरो भास्कर ॥ १२

नीरोगोऽपि कुशाग्रधीरपि जनो निर्विघ्नकार्योऽपि सन्
रुग्णः स्याज्जडधीश्च वन्ध्यकृतिको वीतानुकूल्ये विधौ ।
श्रीरामो गुरुदत्तराज्यपदवीं जातोऽपि विष्ण्वंशतः
स्वीकर्तुं न शशाक दुर्गमवनं चाध्यास्त हे भास्कर ॥ १३

कारुण्यार्द्रमनाः विपन्नशरणं कालानुसारं जनो
यत्कुर्यात्कठिनं वदेच्च परुषं रम्यावसानं हि तत् ।
ह्रादिन्याक्षिविघातकः स्तनिततः श्रोत्रज्वरापादको
मेघो वर्षति जीवनं प्रशमनं संजीवनं भास्कर ॥ १४

अन्येनाचरितामपाकृतितर्ति विस्मृत्य तस्मै सदा
पथ्यान्यातनुते गुणी न कुरुते प्रत्यप्रियं चेतसा ।
आस्वाद्यं नवनीतमेव मथितं मन्थेन दत्ते दधि
व्रीहिस्तंडुलमिष्टमप्यवहतोऽयोऽग्रेण हे भास्कर ॥ १५

किं मे सर्वजनातिशायिबलिनो लोके न लभ्यं भवे-
दित्याप्तुं हि पतिव्रतामभिलषन्नन्यस्त्रियं सीदति ।
किं नासीद्विनिकृत्तकण्ठनिचयो लङ्काधिपो रावणः
सीतां रामसतीं बलादपहरन्साकं निजैर्भास्कर ॥ १६

आयाति स्वयमेव सम्पदतुला स्वप्नेऽप्यनातर्किता
स्वोद्योगेन विनापि मानवमहो दैवानुकूल्ये सति ।
अम्भोधेर्मथनात्सुरासुरगणाः श्रान्ति परां लेभिरे
विष्णुस्त्वाप रमां च कौस्तुभमणिं चागन्तुको भास्कर ॥ १७

कोणे क्वापि निलीनमार्यपुरुषं तुष्टं सदा स्वात्मना
नेर्ष्यालुस्सहते जनो हि कुरुते तस्यापकारं मुधा ।
वस्त्रालिं धरणीभृतोऽपि परमप्रीतेः पदं संदशे-
दत्यर्घामपि पेटिकाविनिहितां कीटः कुतो भास्कर ॥ १८

श्राम्यन्तोऽपि सदाङ्गभङ्गविकलं स्वीयार्थसम्पादने
मोघा एव भवन्ति कार्यचतुरा दैवे प्रतीपं गते ।
क्षीराब्धौ मथितेऽपि दैत्यविबुधैस्सोढाधिकश्रान्तिभिः
पीयूषं किमु मन्दभाग्यदनुजैरास्वादितं भास्कर ॥ १९

दुष्टात्मा नियतं सदापकरणेष्वन्यस्य सक्तो भवे-
दत्यल्पामपि चिन्तयेदुपकृतिं स्वात्मोपघातं बत ।
पूर्ण पुष्पफलैर्महीरुहमहो कीटो विधत्ते क्षतं
दातुं नोत्सहते जलाञ्जलिमपि प्रीत्या गुरो भास्कर ॥ २०

मंदोऽज्ञश्च जनो बुधैस्सह सदा कुर्वन्निवासादिकं
ज्ञातुं नैव गुणोत्तरत्वमतुलं तेषामलं प्राज्ञवत् ।
आस्वाद्यावधिभूतपाकमहिमा विज्ञायते जिह्वया
न त्वभ्यन्तरसंततस्थितिभृता दर्व्या क्वचिद्भास्कर ॥ २१

साकं दैवकृपाद्रवीक्षितलवेनायाति सम्पत्परा
क्षीणेऽस्मिन्क्षयमेति सापि विपदः प्रादुर्भवन्त्यप्यहो ।
तेजश्शालि विभावसोर्व्यतिकरादङ्गारखण्डं भवेत्
तस्यापायवशादपाकृतरुचि श्यामं पुनर्भास्कर ॥ २२

श्राम्यन्तं किमु मन्दबुद्धिविभवं लक्ष्मीरनह जनं
स्वीयानुग्रहपात्रतामुपनयेद्विज्ञं यथा भूतले ।
किं मत्तद्विपकुम्भपाटनविधौ दक्षेण सिंहेन यत्
लभ्यं तत्पिशितं सृगालसुलभं दृष्टं गुरो भास्कर ॥ २३

यत्रास्ते कुजनो विनिंदितकृतिस्तत्रैति तादृग्जनो
देशं त्वध्युषितं पवित्रचरितैः संवर्जयेन्नारकम् ।
दुर्गन्धप्रियमक्षिका हि निपतेत्पूयप्रपूतिक्षते
कस्तूरीं ललनाललाटतिलकं नापि स्पृशेद्भास्कर ॥ २४

पर्याप्तो ह्ययमेक एव पुरुषः कार्यस्य संसिद्धये
युक्तो यो धिषणात्मदेहजगुणैस्सर्वार्थसंसाधकैः ।
एकाकी किल पार्थ एव विशिखैस्वीयैरनन्तैर्जयन्
सैन्यं कौरवपार्थिवस्य जगृहे यूथं गवां भास्कर ॥ २५

निष्णातो न भवेत्कलासु सकलास्वाप्त्यै जनो निर्वृतेः
एकोऽलं मनुजस्य भाग्यविभवः प्राग्जन्मकर्मार्जितः ।
का विद्या समुपाददे नु शिलयाऽभ्यर्चन्ति यत्तां नताः
आपाद्य प्रतिमाकृतिं सुरभिभिस्सूनैर्जना भास्कर ॥ २६

मर्यादारहितानकार्यनिरतान्जह्यात्स्वकीयान्जनो
धर्मासक्तधियश्शुभानि चरतश्शत्रूनपि प्राप्नुयात् ।
किं तत्याज विभीषणो न विगुणं स्वीयाग्रजं रावणं
किं नासीच्च समाश्रितामितगुणश्रीराघवो भास्कर ॥ २७

पूर्वे जन्मनि यन्नरेण चरितं कर्माशुभं वा शुभं
तद्बीजं नियतानुभाव्यफलदं कर्तुः क्रमाद् दृश्यते ।
वृक्षे केन विलम्बिता हि जतुका बद्धोर्ध्वपादा कुतः ?
वक्तव्योऽत्र तदीयकर्ममहिमा हेतुत्वतो भास्कर ॥ २८

साह्यं दद्युरनल्पविक्रमबलोपेताः; स्वयं स्यान्महान्;
दैवेऽचिन्त्यगतौ विरोधिनि सति व्यर्थं समस्तं भवेत् ।
तातेन स्वयमीहितं कुलगुरोः प्राप्तानुमोदं च तत्
रामस्याप्यभिषेचनं किमभवद्भद्रासने भास्कर ॥ २९

देवैः स्वैश्शपमानमप्यसुजनं स्वीयार्थसंसाधकं
धूर्तं नोपसरेत्कदापि मधुरा उक्तीर्नरो विश्वसन् ।
अन्तःस्थापितभक्ष्यगंधवशगो ह्याखुः पतेत्पञ्जरे
जाले धीवरसारिते च कपटावेदी गुरो भास्कर ॥ ३०

विद्वानस्तु महीक्षितोऽस्तु तनयः पूर्णोऽस्तु सर्वैर्गुणैः
यन्नासील्लिखितं ललाटफलके स्रष्ट्रा न तत्प्राप्नुयात् ।
विद्यानां निलयश्च देशिकवरः सूनुः प्रियो धूर्जटेः
दारान्नाप विनायको द्विपसमोऽप्यसद्गुरो भास्कर ॥ ३१

कामान्न प्रभवेयुरीप्सिततमानाप्तुं यतो याचकाः
किं वा तस्य धनैः श्मशानसुमनस्तुल्यैर्निरर्थैः फलम् ।
तादृक्सत्त्वविनाशयोर्न हि विदुः स्वल्पं विशेषं जनाः
किं पक्वैरथ शोषितैर्विषफलैर्भोज्येतरैर्भास्कर ॥ ३२

कर्माण्याचरितानि पूर्वजनने दास्यन्त्यवश्यं फलं
यत्सर्वं नियतं हि भोग्यमवशैः वार्यं गतैर्न क्वचित् ।
पारावारजलेषु निर्मितमहासौधे परीक्षित्पुरा
लीनोऽपि द्विजरूपसर्पदशनादस्तंगतो भास्कर ॥ ३३

वंशेऽप्युज्ज्वलकीर्तिभासितदिशान्तेऽपि प्रतिष्ठाभृतः
कादाचित्कतया भवन्ति विरला दिव्यानुभावा नराः ।
आकाशे बहुतारकाग्रहयुते चन्द्रार्कमात्रात्प्रभा
छत्रार्थास्तरुपुङ्गवन्ति विरला दण्डा गुरो भास्कर ॥ ३४

दुष्टान्क्रूरकृतीनपाकृतिरतान्संसेवमानाः प्रभून्
सन्तोऽनिन्दितवृत्तयोऽपि मनुजा अन्ते स्युरेतादृशाः ।
सुस्वादूदकसंभृता हि सरितो गंगादयस्संगताः
क्षाराम्भोनिधिना भवन्ति नितरां क्षारोदका भास्कर ॥ ३५

मर्तव्यं पुरुषेण यत्र च यथेत्याचिन्तितं ब्रह्मणा
तत्र स्याच्च तथैव चास्य मरणं नाकर्तुमीष्टे विधिः ।
काश्यां मृत्युमपेक्ष्य शूद्रकनृपः पङ्गुर्भवन्स्वेच्छया-
प्यानीतो बहिरश्वरूपविधिना प्राणान् जहौ भास्कर ॥ ३६

उद्वेलो बलशक्तिशौर्यविभवोऽप्यात्मोपघाती भवेत्
न स्यादिन्द्रियनिग्रहो यदि गजस्येवाङ्कुशेनाहतिः ।
उत्कूलं हि जलाशयस्थितजलं कूलस्य दार्ढ्यं न चेत्
भिन्दत्तत्सलिलाशयस्य कुरुते नाशं गुरो भास्कर ॥ ३७

प्रज्ञाशौर्यबलाधिकोऽपि मनुजः स्वीयार्थसंसिद्धये
वाञ्छेन्नीचजनस्य साह्यमपि चेदत्रास्त्ययुक्तं न हि ।
श्रीकृष्णप्रसवप्रकाशनभिया प्राग्गर्दभस्याग्रतः
किं नासीद्वसुदेव आनतशिरा अस्मद्गुरो भास्कर ॥ ३८

सम्पन्ने महिते परोपकरणान्नैस्स्व्यं गते मानवे
शक्तोऽस्योद्धरणे महाविभव एवोना न संख्यातिगाः ।
कासारं जगतस्तृषोऽपनयनाच्छुष्कं महान्तं क्षमो
मेघः पूरयितुं जलैर्न तुहिनासाराः पुनर्भास्कर ॥ ३९

हीनश्चन्द्रकलावतंसकृपया विज्ञो धनी वा पतन्
नीचस्याश्रयणाद्यदीच्छति भृतिं नानौचिती काचन ।
विश्वामित्रवशिष्ठयोः कलहतः प्राप्तो दशां दुस्सहां
चण्डालं श्रितवान्नृपोऽपि स हरिश्चन्द्रः पुरा भास्कर ॥ ४०

दैवेनोपहतः प्रतीपगतिना मर्मच्छिदा मानवो
भूयिष्ठोऽपि बलानुभावमतिभिर्नीचस्य वश्यो भवेत् ।
नागेन्द्रं मदवारिवासितकटं चाचिन्त्यशक्त्यन्वितं
किं नारोहति नाङ्कुशेन च तुदत्याधोरणो भास्कर ॥ ४१

पाण्डित्यं महितं भवेदपि नरस्यानन्यसाधारणं
व्यर्थं तद्धि रसज्ञताविरहितं गर्ह्यं रसज्ञैस्सदा ।
किं प्राणै रहितेन चारुवपुषालंकारयुक्तेन वा
किं वा भीमकृतैर्विलुप्तलवणैः पाकैर्गुरो भास्कर ॥ ४२

आचाराधिकपूतवंशजनिमप्यत्यन्तदोषास्पदं
पुण्यः कोऽपि समुद्दिधीर्षति जनं तस्यान्वये गौरवात् ।
यत्कण्ठे शितिकण्ठ ऐच्छदवितुं हालाहलं संततं
स क्षीराम्बुधिजन्मनो हि महिमा तस्य ध्रुवं भास्कर ॥ ४३

संप्राप्य प्रबलो विचार्य कुरुते कार्योपदेशं यदि
श्रोत्रं यो न ददाति तस्य कथमप्येष ध्रुवं नश्यति ।
दायं देहि युधिष्ठिराय निजमित्याबोधितश्शौरिणा
सोत्प्रासं न सुयोधनस्तदकरोज्जज्ञे च हे भास्कर ॥ ४४

INSTITUTE OF ADVANCED

स्वाकार्यं स्वयमप्रकाशितमपि प्रच्छादितं यत्नतोऽ
प्याविर्भावमुपैति कालवशतः शाम्येत्कथंचिन्न तत् ।
सौवर्णद्रवरूषितं प्रथमतः स्वं गोपयेत्पित्तलं
जीर्णे लेपनवस्तुनि प्रकटयेद्रूपं निजं भास्कर ॥ ४५

मत्तो यौवनवित्ततः स्वपरविज्ञानेन हीनो जनो
वैरं प्राप्य बलीयसा सहचरेणैकान्ततस्सीदति ।
अग्नौ दह्यत एव मूढशलभो निर्वापणेच्छुः पतन्
मेषो भिन्नशिरा युयुत्सुरचलेनासद्गुरो भास्कर ॥ ४६

अज्ञात्वा प्रकृतिं यतेत विमुखं नाज्ञं विनेतुं बुधो
दोषे दर्शित एव रोषविवशः पथ्यैषिणा स्यादसौ ।
संतप्ते शमनेच्छया क्षिपति यस्तैले जलं मन्दधीः
नालं तत्र भवेत्स किं तु जनयेज्ज्वालां गुरुं भास्कर ॥ ४७

स्वार्थो मे न भवत्यतः कृतिमिमां नैवारभेयाहमि-
त्युत्कृष्टो न दधीत चेतसि जगत्कल्याणकृत्स्यादयम् ।
किं लोकान्न सदा सहस्रकिरणः श्रान्तिं विना भासय-
त्युर्व्याः किं न भरं सहस्रफणवान्वोढाऽनिशं भास्कर ॥ ४८

दौर्भाग्यं श्रयते यदीह पुरुषं नित्यानपायित्वतः
संपद्भिः सुहृदां च बान्धवगणस्याप्यस्ति नेषत्फलम् ।
मृत्पिण्डः प्रतिबिम्बदर्शनविधौ नालं विधेस्साह्यतोऽ-
प्यालोकेऽपि च नेक्षतेऽन्धनयनं रूपं गुरो भास्कर ॥ ४९

न्याय्यान्याय्यविवेचनं स हि नरः कर्तुं भृशं पारयेत्
यश्चातुर्यशमान्वितो, निपुणताहीनः प्रलुब्धश्च न ।
नीरक्षीरविभेदने कुशलता हंसस्य संलक्ष्यते
मार्जारस्य न लम्पटस्य पयसः पाने पुनर्भास्कर ॥ ५०

औदार्यात्पुरुषस्तनोत्युपकृतिं गुर्वीं कृतघ्नस्य यो
दौष्ट्यं तस्य स वर्धयेन्न जनयेत्कार्तज्ञ्यमीषत्पुनः ।
क्षीरं यो भुजगाय यच्छति दयाविष्टान्तरङ्गो जनो
दंष्ट्राणामभिवर्धयेद्विषमसौ तस्य ध्रुवं भास्कर ॥ ५१

अस्वायत्तकृतिः स्वकार्यकृतये स्वाधीनसिद्धिं परं
वृत्वा तत्सहकारतो यदि कृती स्यात्तद्धि नासांप्रतम् ।
कस्तूरीतिलकं ललाटफलके स्वीये विधास्यन् जनः
साहाय्यं समपेक्षते करगतादर्शस्य हे भास्कर ॥ ५२

उद्वोढुं स्वकुटुम्बभारमधिकं दक्षः कुटुम्बी न चेत्
आयान्तोऽपि सहस्रशोऽर्थनिचयाः गच्छन्ति शीघ्रं ततः ।
नूनं निर्झरिणीप्रवाहततिषु प्राप्तास्वपि स्वान्तरं
किं धर्तुं प्रभवेज्जलं क्षततटो दृष्टो ह्रदो भास्कर ॥ ५३

दातृत्वेन परोपकारकरणैश्शून्यस्य लुब्धस्य चेत्
दारिद्र्यं यदि वा धनित्वमतुलं न स्याद्विशेषस्ततः ।
अंधो वेत्ति किमन्तरं दिननिशामध्यार्धयोः कालयोः
षण्डो भेदमवैति किं नु वटुतागार्हस्थ्ययोर्भास्कर ॥ ५४

योे दातृत्वगुणान्वितो वितरणाच्छून्यार्थजातो भवेत्
याचित्वापि परान्परोपकरणे सक्तो भवेत्सोऽनिशम् ।
अम्भोधेरुपनीतनीरनिचयो मेघो जलं वर्षति
स्वैरं स्थावरजङ्गमात्मकजगत्संजीवनं भास्कर ॥ ५५

ऐश्वर्यं पुरुषस्य दानगुणतो हीनस्य लुब्धस्य यत्
तूर्णं तत्प्रपलायते दृढतरं बद्ध्वापि संरक्षितम् ।
शाल्मल्या जनभोज्यतामनुपयन्नम्य: फलानां चय:
किं न स्यात्पतित: स्वयं च विपिने शीर्णश्च हे भास्कर ॥ ५६

दारिद्र्ये प्रतिकूलदैववशत: प्राप्ते महात्मापि सन्
मर्त्य: स्वोदरपोषणाय विदधद्याच्ञां न निन्द्यो भवेत् ।
दुर्दैवोपहता: सुताश्च रमणी पाण्डोर्धरित्रीभुजोऽ-
प्येकच्छत्रपुरे वपूंषि पुपुषुर्भिक्षाटनाद्भास्कर ॥ ५७

प्रावीण्यं न वचस्सु यस्य मनुजस्यासावयुक्तं यदि
ब्रूयादज्ञतया विवेकसहिता: क्षाम्यन्ति निन्दन्ति न ।
प्रीत्या पश्यति हि स्तनंधयशिशो: स्खालित्ययुक्तां गतिं
नोपालब्धुमना मनागपि भवत्यस्मिञ्जनो भास्कर ॥ ५८

कर्तव्यं विबुधेन बोधितमपि स्वानुग्रहेच्छावता
नापि श्रोतुमना: करोति नितरां क्षेष्यन् जनो भूतले ।
किं जघ्ने न विभीषणोक्तमचरन् साकं निजै रावणो
गांगेयस्य सुयोधनोऽपि वचसो न्यक्कारतो भास्कर ॥ ५९

काष्ठारूढमहत्त्ववानपि नरो नीचैर्दशामाप्नुवन्
अन्यैरुद्धरणीय एव चतुरैः नालं स्वयं वर्धितुम् ।
रक्ष्योऽन्यैर्निपुणः प्लुतावपि जनो नद्यां निमज्जञ्श्रमात्
क्षीणाग्नि ज्वलतीन्धनं हिं चलितं चोद्दीजितं भास्कर ॥ ६०

आसीनेष्वध एव पण्डितवरेष्वल्पो जनो दर्पतः
पीठे तिष्ठति चेत्समुन्नततमे तेषामवज्ञा कथम् ।
शाखाग्रं गहनेऽधितिष्ठति तरोः शाखामृगे हेलया
नीचैस्सन्ति मृगेन्द्रहस्तिशरभव्याघ्रादयो भास्कर ॥ ६१

उत्सेकादवमन्यते यदि सतो दुष्टो मदान्धस्तदा
तत्कार्याण्युपयान्ति भङ्गमचिरात्प्राणापदं चैति सः ।
न्यक्कारात्प्रमथाधिपस्य यजनं दक्षेण निर्वर्तितं
व्यर्थं सज्जनयां बभूव निधनं तस्याचिराद्भास्कर ॥ ६२

कार्यं सत्पुरुषः सुदुष्करमपि श्रेयश्चिकीर्षेरितो
लोकस्यात्मसुखाभिलाषरहितः कर्तुं व्यवस्येत्सदा ।
गोगोपान्परिरक्षितुं मघवतः पाषाणवृष्ट्याहतेः
कृष्णेनोद्धृतमातपत्रमचलो गोवर्धनो भास्कर ॥ ६३

नीचोऽत्यन्तलघुर्जनस्सदसतोर्भेदानभिज्ञस्सदा
रूक्षाण्येव वचांसि वक्ति न तथा धीमानुदारो जनः ।
कांस्यं तीव्रनिनादमेव कुरुते स्वर्णं तु मन्दं स्वन-
त्यापोऽपूर्णघटे चलन्ति न पुनः पूर्णे तथा भास्कर ॥ ६४

सन्तः सूनृतवादिनो हि सततं नैवाप्रियाभाषिणः
कार्यापेक्षितया कठोरवचनाश्चेत्तावता न क्षतिः ।
संतापप्रशमाय शीतलजलं मेघः प्रदत्ते सदा
वैरल्यात्पतितास्ततोऽपि करका दद्युर्गुरो भास्कर ॥ ६५

साधुक्षुण्णपथं विहाय वपुषा पुष्टेन रम्योऽपि सन्
दोषं नान्तरमुज्झितुं प्रभवति प्रत्येयतां नार्हति ।
स्निग्धं स्याद्विषमुष्णिकाफलमतीवाह्लादनं नेत्रयोः
तिक्तत्वं समुपैति दुस्सहमिदं त्वभ्यन्तरे भास्कर ॥ ६६

दौर्भाग्योपहतं विधौ हि विमुखे दीनामवस्थां गतं
नेच्छन्त्यालपितुं जनाः प्रणयतो नाहूय सत्कुर्वते ।
नूनं म्लानिमुपागतं सुकुसुमं सौरभ्यहीनं नरैः
स्पर्शेनापि न मान्यते हि नतरां संधार्यते भास्कर ॥ ६७

दोषैर्ज्ञैर्गुणवान्हि रूपविभवैर्हीनोऽपि सम्मान्यते
नैवं रूपविभूतिमानपि खलः सत्कारपात्रं भवेत् ।
खर्जूरं फलमीप्स्यते मधुरताहेतोररम्याकृति
त्याज्यं स्वर्णसमं चितं च कृमिभिस्त्वौदुम्बरं भास्कर ॥ ६८

उत्सेकात्सदसद्विवेकरहिताः सत्येतरैर्भाषणैः
कौलीनास्पदमीश्वरं विदधतः सीदन्त्यवश्यं जनाः ।
मिथ्यागर्हणमाश्रितौ सुबहुधा यौ राजसूये सवे
श्रीकृष्णे शिशुपालदन्तवदनौ तौ नेशतुर्भास्कर ॥ ६९

रागद्वेषवशीकृतो हि मनुजो नीचं महाकर्मणि
प्राज्ञं क्षुद्रकृतौ विचारविधुरो मोहान्नियुङ्क्ते भुवि ।
योऽद्याद्वामकरेण मृष्टमशनं प्रक्षालयेच्चाप्यधो-
मार्गं दक्षिणपाणिना स हि नरः कुत्स्यो भवेद्भास्कर ॥ ७०

लोकाराधनतत्परं गुणयुतं राजानमत्यादृताः
सेवन्ते हि विवेकरम्यमतयो निष्काममेव प्रजाः ।
साकाङ्क्षं शशिनं चकोरततयः पूर्णं प्रपश्यन्ति यत्
तत्तस्यामलकौमुदीसुभगताकार्यं गुरो भास्कर ॥ ७१

सर्वश्लाघ्यगुणोत्तरो हि पुरुषो निर्विष्टखेदोऽपि सन्
लोकस्योपकृतिं तनोत्यगणयञ्श्रान्तिं परामात्मनः ।
घ्राणाप्यायिगुणान्वितं मलयजं घृष्टं शिलायां वमत्-
सौगन्ध्यं महते महाय हि नृणां सम्पद्यते भास्कर ॥ ७२

सम्प्राप्ते समये बलक्षयकृति प्राचीनकर्मानुगे
धर्तुं न प्रभुशक्तिमानपि जनः शक्नोति पूर्वां स्थितिम् ।
पूर्वं निर्जितशङ्करोऽपि विजितः पार्थः किरातैः भवन्
कृष्णस्यापि परिग्रहान्निकमशकत्संरक्षितुं भास्कर ॥ ७३

प्राबल्यं समुपेयुषो वितनुते साह्यं स्वयं बान्धवः
साहाय्यं न स दुर्बलस्य कुरुते वैरी च सम्पद्यते ।
दृष्टो दीप्तिमतोऽनलस्यद हतो दावं सहायोऽनिलो
दीपाकारभृतं तमेव स पुनर्निर्वापयेद्भास्कर ॥ ७४

दक्षेणैव गुणाधिकेन विभुना गोष्ठी भवेद्भूषिता
क्षुद्राणां वहुभिश्शतैरपि पुनर्नास्याः प्रतिष्ठा भवेत् ।
ईष्टे गाढतमोऽपहन्तुमखिलं नक्तं यथा चन्द्रमाः
तारा नैवमलं भवन्ति गगने सङ्ख्यातिगा भास्कर ॥ ७५

पूर्वं काश्चन देवताः त्रिजगतीश्लाघ्यप्रभावाः कुतोऽ-
प्यध्वानं प्रविहाय चेरुरिति नास्माभिः प्रवर्त्यं तथा ।
आचान्ताखिलवारिधेः क इतरोऽगस्त्यस्य मार्गे व्रजेत्
अर्हन्ति स्तुतिमेव नानुकरणं लोकोत्तरा भास्कर ॥ ७६

धीमन्तोऽखिलनीतिशास्त्रनिपुणाः सन्तोऽप्यमात्या भृशं
शक्ता नैव विधातुमीषदपि भूंजानेरनिष्टां कृतिं ।
भीष्मद्रोणकृपादियोधनिचयः सर्वार्थसम्पादको
नालं वारयितुं कुमार्गगमनाद्दुर्योधनं भास्कर ॥ ७७

सम्पन्नः सकलातिशायिवलतोऽप्युत्सेकमात्रान्नरो
निर्बुद्धिर्न पराक्रमेत स तदा सीदेद् ध्रुवं दुर्गतः ।
धानुष्केष्वधिकः पराक्रमवतां चाग्रेसरोऽप्यब्रुवन्
श्रीकृष्णं धनुराततज्यमकरोत्पार्थः कदा भास्कर ॥ ७८

दौर्भाग्योपहतं च हीनविभवं भाग्याधिका बन्धवो
भूयांसोऽपि न शक्नुवन्ति धनिनं कर्तुं प्रयत्नादपि ।
वीक्षामात्रवितीर्णभाग्यविभवा धन्यात्मनामात्मनो
लक्ष्मीर्नाकृत सोदरीं धनवतीं ज्येष्ठां कुतो भास्कर ॥ ७९

क्षुद्रेणापि जनेन साधुपुरुषः साह्याय सम्प्रार्थितो
नैनं त्यक्तुमनाः कदापि तनुते तस्योपकारं परम् ।
धर्मज्ञस्स युधिष्ठिरः स्वशुनकं नीत्वा विमाने पुरा
नाकस्थं च विधाय निर्जरचयं व्यस्माययद्भास्कर ॥ ८०

प्राणापायगतोऽपि मानमहितः शत्रुप्रयुक्ता गिरः
सोढुं नोत्सहते निरोधकरणादान्तं निवृत्तो न हि ।
अग्रस्थो भुवि मानिनां ह्रदजले तिष्ठन्निमग्नोऽरिभिः
युद्ध्वा भूमिगतो विपत्तिमगमद्दुर्योधनो भास्कर ॥ ८१

सम्राट्स्थानमधिष्ठितोऽपि नृपतिर्बोद्धुं परेषां स्थितिं
चारं छिद्रविदं नियुज्य विजये शक्तस्तदीये भवेत् ।
श्रीरामोऽपि विभीषणाद्दशशिरोनाभिस्थपीयूषवित्
नावर्त्स्यद्यदि नाहनिष्यदमुमप्यायोधने भास्कर ॥ ८२

आरब्धं स्वमनःप्रियं च विबुधः कार्यं सतां सम्मतं
प्रीत्यै नाल्पधियां प्रकल्पत इति प्रोज्झेन्न तत्रादरम् ।
अज्ञैर्दर्शितदोष इत्यतिसृजेन्नात्मीयवादं सुधीः
स्पृष्टो मक्षिकयेति भोज्यनिचयं नैव त्यजेद्भास्कर ॥ ८३

भार्याया वशगः तदीयधिषणानेयात्मबुद्धिस्सदा
युक्तायुक्तविचारणेष्वकुशलस्सीदेत्स्वयं मानवः ।
कैकेय्या युवतेः स्वलाभफलकान्याकर्ण्य वाक्यान्यहो
श्रीरामस्य विवासनाद्दशरथः प्राणान् जहौ भास्कर ॥ ८४

प्राचीने जनने कृतं हि वृजिनं मोघेतरद्बीजवत्
भोग्यं स्यान्नियतं दुरन्तफलदं जन्मान्तरे मानवैः ।
श्रीरामो हि निरागसं स्वविषये हत्वा शरैर्वालिनं
कृष्णत्वे निहतः किरातविशिखैस्तीक्ष्णैर्गुरो भास्कर ॥ ८५

विद्वांसं रसिकं यथा क्षितिपतिः संमानयत्यादरात्
नैवं सत्कुरुते रसानुभवनैर्हीनं जडं मानवम् ।
कीरं प्रीतिकरं यथोक्तवचनं संवर्धयन्ते रसात्
काकं नापि कटुध्वनिं खलु जना आदित्सवो भास्कर ॥ ८६

अज्ञात्वा प्रकृतिं परस्य न जनः तं संश्रयायाप्नुयात्
हास्यत्वं गमयन्ति बाधितुमपि क्षुद्रा यतन्ते श्रितम् ।
सावर्ण्यादविचार्य साधु निकटं प्राप्तं पिकं वायसाः
कर्णारुन्तुदराविणो विदधते पादाहतं भास्कर ॥ ८७

धैर्यौदार्यगुणप्रकर्षरहितं लुब्धं जनं विश्वसन्
प्रारिप्सेत महाकृतीरविमृशन् यस्स ध्रुवं नश्यति ।
नौतार्यं मकरादिभिर्जलचरैः पूर्णं च वारांनिधिं
सच्छिद्रोडुपतस्तरन्नकुशलो मग्नो भवेद्भास्कर ॥ ८८

सम्पन्नान्विभवैश्च शीलविभवैर्लोकोत्तरान्मानवान्
आश्रित्यापि नरो न याति धनितां दैवानुकूल्येऽसति ।
वोढाप्यात्मभुवो निजेन सततं पृष्ठेन पूतेन किं
हंसः पद्मपलाशमात्रभृतिको न स्याद्गुरो भास्कर ॥ ८९

नीचाद्दुर्वृत्तमप्रवृत्तिसहिताज्जातोऽपि सूनुः पितुः
स्वीयप्राक्तनपुण्यकर्मवशतः सर्वोत्तमः संभवेत् ।
बीजादल्पतमाद्भवन्नपि तरुर्न्यग्रोधनामा भुवि
प्रेक्ष्यः स्यात्सकलोन्नतः पृथुतमश्चास्मद्गुरो भास्कर ॥ ९०

प्रत्यब्दं ह्यटवीतले त्रिचतुरान्व्याघ्री प्रसूते शिशून्
द्वित्रास्त्वेव शरत्सु पश्यति जनो वत्सं तु गोरेककम् ।
शार्दूलस्य कुलं तथापि न महत् धेन्वास्तु तद्वर्धते
धर्माधर्मचयः प्रयाति हि तथा वृद्धिक्षयौ भास्कर ॥ ९१

बन्ध्यं नैव कदाप्यनार्यमनुजैः सख्यं समं भूतले
कामापेक्षितया विधेयमपि तत्प्राप्यं न दार्ढ्यं पुनः ।
आस्वादाय हि योज्यतां मिततया ताम्बूलपत्रैस्सुधा
निक्षिप्ता त्वतिमात्रमत्र रसनां सा पीडयेद्भास्कर ॥ ९२

विद्योपार्जनतो जगाम विभवं कश्चित्कृतीतीतरो
विद्यासागरपारगोऽस्तु नियतेस्साह्याद्विना नैति तम् ।
कर्णे रन्ध्रविवर्धनं तु सुकरं लभ्यं कथं कुण्डलं
पर्याप्तं न हि पौरुषं फलकृते दैवं विना भास्कर ॥ ९३

सम्पन्नः पुरुषोऽपि दैववशतः प्रक्षीणभाग्यो भवन्
जह्याच्चेन्न धृतिं तदा स विभवं स्वीयं पुनः प्राप्नुयात् ।
मासान्ते प्रविनाशिताखिलकलः पीयूषरश्मिः पुनः
पूर्णत्वं प्रतिपद्यते हि नचिरादस्मद्गुरो भास्कर ॥ ९४

सर्वेषां हृदयङ्गमस्य कृतिनः पुण्यात्मनोऽप्यापदः
कादाचित्कतया भवन्ति तदनु क्षिप्रं विनश्यन्ति च ।
लोकानन्दकरो विधुन्तुदमुखं प्राप्तस्सुधांशुस्ततो
निष्क्रामत्यचिरात्प्रयाति च पुनः पूर्वां स्थितिं भास्कर ॥ ९५

उत्साहप्रभुमन्त्रशक्तिसहितो नीचामवस्थां गतोऽ
प्यभ्यस्तेन पथा चरन्वितनुते लोकोपकारं जनः ।
एकच्छत्रपुरे पुरा कृतरहोवासः स्वकीयैस्समं
भीमो विप्रततिं ररक्ष दनुजं हत्वा बकं भास्कर ॥ ९६

सम्पन्नेऽपि गुणोत्करेण सुलभो दोषः कदाचिल्लघुः
तस्मिन्दर्शित एव सत्पथगतैः हातुं पवृत्तस्य तम् ।
माधुर्यादिगुणैर्युतं हि सलिलं कालुष्यदोषास्पदं
पिष्टेनामलतामुपैति कतकस्यास्मद्गुरो भास्कर ॥ ९७

कारुण्यार्द्रमनाश्च कार्यचतुरः प्राप्तोऽपि दीनां दशां
साहाय्यार्थमुपेयते हि मनुजैः पूर्वं यथा प्रायशः ।
निष्कृष्टे मधुरे रसे निपतितं पिष्टं यदिक्षोर्भवेत्
प्रीत्या तद्धि पिपीलिकास्सुबहवो गच्छन्ति हे भास्कर ॥ ९८

विद्वद्भिश्च विवेकरम्यमतिभिः शीलान्वितैर्मानवैः
सांगत्यात्प्रभवन्ति तादृशविधां प्राप्तुं न मूर्खा जनाः ।
कासाराम्भसि राजहंसनिचयैः सार्धं चरन्तो बकाः
दृष्टाः प्राप्ततदीयरम्यगतयः केनापि किं भास्कर ॥ ९९

स्वस्थानच्युतिमेत्य शक्त्यधिकतायुक्तो बली मानवो
जय्यो दुर्बलमानवेन सुखतः स्वस्थानसंस्थावता ।
मत्तेभो गहने निरर्गलगतिः स्यान्नाम सर्वाधिको
नक्रेणापि स हन्यते जलचरेणाम्भस्सु हे भास्कर ॥ १००

सम्पन्नाय वितीर्यमाणमखिलं वैयर्थ्यमापद्यते
रिक्तानां विषये तु तत्फलकृते सम्पद्यते सर्वदा ।
सार्था वृष्टिरवग्रहेण कलमैः संशोषिभिस्संगता
मोघाब्धौ पतिता तु काननभुवि ज्योत्स्नेव हे भास्कर ॥ १०१

ईप्सा चेद्विभवस्य केसरिगुहाभ्याशः समाश्रीयतां
प्राप्या यत्र सुखेन गन्धकरिणां मुक्ताः च्युताः कुम्भतः ।
किं वा जम्बुकवासभूमिविवरस्यासत्तितो लभ्यते
शृङ्गाण्यस्थिचयं शफान्पशुततेः पुच्छान्विना भास्कर ॥ १०२

किं वा छिन्नमनूनकर्ममहितस्यात्यन्तवंशोन्नते-
रीर्ष्याद्वेषमदैर्मलीमसमनास्तस्यापवादी यदि ।
रम्यक्षीरपयोनिधेरुपरि यद्युड्डीयमानः खलो
विष्ठां वायस उत्सृजेद्विगुणता का तस्य हे भास्कर ॥ १०३

सुश्लाघोत्तमकीर्तिभिः सुतनयैर्भात्यन्वयो दीप्तिमान्
नीचैस्तैरधमप्रवृत्तिभिरयं तेजोविहीनो भवेत् ।
रत्नैराचित एव भूषयति हि स्वार्णोऽङ्गुलीयोऽङ्गुलिं
सोऽन्तःस्थापितकाचपित्तलमयस्तां दूषयेद्भास्कर ॥ १०४

पुष्टिं देहभृतो व्रजन्ति यदि ते स्वेष्टाशनं भुञ्जते
दारिद्र्यादिनिमित्ततो निरशनाः कार्श्यं प्रयान्ति ध्रुवम् ।
अग्निस्तुंगशिखाकलापकपिलो दत्तेन्धनो भासते
नो चेद्भस्मनि लीन एव भजते सोऽदर्शनं भास्कर ॥ १०५

या वृत्तिस्सह जन्मनास्ति मनुजस्यान्तं स्थिरा सा भवेत्
आरोपादुपदर्श्यमानमखिलं शीघ्रं विनश्येद् भुवि ।
कान्तिः काञ्चनभूषणस्य सततं संदृश्यते पूर्ववद्
घृष्टस्त्वायसपट्ट एति नचिराद्विच्छायतां भास्कर ॥ १०६

जातो नीचकुले बहूत्तमगुणैस्संभूषितत्वान्नरो
लोकप्रीतिकरो भवन्नपि जनैर्दोषात्सदोषो भवेत् ।
रूपस्पर्शनगन्धसुन्दरतया सर्वान्हरेत्पङ्कजं
पङ्काज्जाततया सुधांशुममलं द्वेष्टयेव हे भास्कर ॥ १०७

किंचिज्ज्ञस्य च चारुकाव्यरचनाशक्त्या विहीनस्य चा-
प्येषा मे कविता भवत्करुणया विज्ञान्समाराधयेत् ।
नेपथ्यान्तरतः स्वकार्यचतुरेणाक्रीडिताः शिल्पिना
प्रीणन्त्येव हि चर्मणापि विहिता नः पुत्रका भास्कर ॥ १०८

बाह्यान्तरतमोभेत्तुर्भास्करस्य प्रसादतः ।
समाप्तोऽस्त्यनुवादोऽयं वरदार्यसुधीकृतः ॥

# श्रीकाळहस्तीश्वरशतकम्

# श्रीकालहस्तीश्वरशतकम्

श्रीविद्युत्कलिताजवंजवमहाजीमूतपापांबुनो
धाराभिः प्रविनष्टमामकमनोऽभोरुड्विकासोऽभवम् ।
देव त्वत्करुणाशरत्समयतः चिद्भावनासेवया
वर्धेऽहं बहुशाख एव भुवने श्रीकालहस्तीश्वर ॥ १

वाणीवल्लभदुर्लभे तव शुभे द्वारे स्थितस्सन्नहं
मोक्षश्रीग्रहणोत्सुकोऽस्मि यदि स द्रोहो नु किं स्यात्त्वयि ।
नो चेदुज्झितनित्यमंगलमिमं प्रापापदं किं जनं
राजद्वारसमाश्रितं च तनुषे श्रीकालहस्तीश्वर ॥ २

मिथ्या सर्वमिदं विचारकुशलस्यैवं विजानन्नपि
स्त्रीसंतानधनासवो न हि मृषेत्येवं सदा चिंतयन् ।
अज्ञानार्णवमज्जनामभिलषत्यात्मन्यनीशो जनो
नत्वीषत्त्वयि भक्तिभावलगनं श्रीकालहस्तीश्वर ॥ ३

दुर्लङ्घ्यं समयस्य बन्धनमिदं कुर्याव सम्यक् शृणु;
स्वान्ते मे समुपास्यसेऽनवरतं काचं विना त्वं मया ।
मा कार्षीः परतन्त्रमेनमरिषड्वर्गस्य; नेहेऽधिकं
नेहेऽश्वान् करिणः श्रियोऽपि बहुलाः श्रीकालहस्तीश्वर ॥ ४

संसारस्थसुखासवेन नितरां मत्तो न जानात्ययं
पापो मामिति किं न रक्षसि महापापाब्धिमग्नं नु माम् ।
किं क्रीडारससंभ्रमेण पतितं कूपे पिता बालकं
शोचन्नोद्धरणाय तस्य यतते श्रीकालहस्तीश्वर ॥

किं देवान्तरवन्दनाद्विरचितो द्रोहो मया स्वामिनः ?
कि वा ते वचने स्थितं न ? किमु वा त्वत्केवलो नास्म्यहम्
नैवं त्वय्यपराद्धमल्पमपि; ते कस्मादुपेक्षा मयि
श्रान्ते संसृतिसागरभ्रमणतः ? श्रीकालहस्तीश्वर ॥

देवक्ष्मारुहकामधेनुविलसत्स्वर्णाचलस्ते धनुः,
मित्रं प्राणसमं च गुह्यकपतिः, विष्णुस्तवाराधकः ।
को वा ते समुपैति साम्यमपरः ? त्वत्सन्निभस्त्वं प्रभो,
कश्चान्यो मम निस्स्वताहतिचणः श्रीकालस्तीश्वर ॥

योद्धुं नालमहं त्वया सह विभो पार्थो धनुष्मान्यथा
कर्तुं न प्रभवामि काव्यरचनैः गन्धर्ववत्प्रीणनम् ।
तातं हन्तुमशक्त एव भवते, त्वां मौसलाग्रेण वा
किं भक्त्या मम ? दर्शनं तव कथं ? श्रीकालहस्तीश्वर ॥

ऐश्वर्यं पितरौ वधूश्च तनया इत्यश्मखण्डं महत्
ग्रीवायां मम बद्धवानसि; कथं त्वां चिन्तयेयं स्थिरः ।
चाञ्चल्यास्पदमानसोद्भवमहामोहार्णवे मज्जितः
सीदामीश्वर ! हापयार्तिमखिलां श्रीकालहस्तीश्वर ॥

त्वन्नामैव यदृच्छया श्रुतमपि प्रोत्सारयेत्पातकं
प्रेताधीश करिष्यमाणमतुलं बाधाच्च वारयेत् ।
मुक्तास्ते च भवेयुरेव कृतिनो यैस्तत्समुच्चार्यते
शास्त्राण्याहुरिदं, न चात्र विशयः श्रीकालहस्तीश्वर ॥ १०

ताम्बूलास्वदने, स्वकीयविनुतेराकर्णने वन्दिनः,
मृष्टान्नेऽप्यशिते, श्रियां विलसने वैवश्यसंपादके ।
गीतीनां श्रवणे च गायकवरात्, दम्भार्थविश्राणने
क्रीडासक्तजनान्किमित्यभिदधे श्रीकालहस्तीश्वर ॥ ११

सेवायां तव सन्तु संततमुदः, प्रादुर्भवन्त्वापदः;
लोकातीतमिमं वदन्तु, यदि वा सामान्यमेव प्रजाः ।
ज्ञानं मेऽस्त्वथवा विमोहतिमिरं; स्युर्नाम भद्रा ग्रहाः,
अन्ये वा; त्वयि मे समैव धिषणा श्रीकालहस्तीश्वर ॥ १२

लूता कां श्रुतिमध्यगीष्ट ? भुजगोऽपाठीच्च शास्त्रं नु किं ?
कां विद्यां गज आदिताथ ? शबरोऽभ्यास्थच्च मन्त्रं नु कम् ?
बोधोत्पत्तिनिदानतां जनचयस्यायान्त्यधीतानि न
त्वत्पादार्चनरागिताविरहिणः श्रीकालहस्तीश्वर ॥ १३

कायो जातकिणो वधूकररुहैर्लूनः, स्तनैर्घर्षणात्
वक्षश्चोन्मृदितं, वयश्च गलितं पुष्पेषुसंक्रीडितैः ।
आक्रान्तं जरया शरीरमखिलं, जाता जुगुप्सा च मे,
संसारात्प्रविरक्तमेव कुरु मां श्रीकालहस्तीश्वर ॥ १४

किंरूपं हृदये भजामि सततं त्वां ? जानु योषास्तनः
प्रस्थो मेषमलः किमेषु भवतो रूपं भवेद्भद्रदम् ? ।
संदेहं प्रणिहत्य दर्शय निजां मूर्तिं सुधां नेत्रयोः
चिन्नीरेजविहारमत्तमधुप ! श्रीकालहस्तीश्वर ॥ १५

किं त्वां बाण इव न्ययूयुजमहं दौवारिकं स्वात्मनः ?
किं त्वाऽकुर्वि सुराङ्गनानिकटगं दूतं मनुः प्रागिव ? ।
भुङ्क्ष्वोच्छिष्टमिदं ममेति किमुपारुन्धं भवन्तं ? कुतः
कर्णे रक्षणयाचनां न कुरुषे ? श्रीकालहस्तीश्वर ॥ १६

हस्तौ मे सरतः शिलाप्रहरणैः पूजाविधाने न ते;
नालं तर्पयितुं स्वसूनुहननात्त्वां, लोचनोत्कर्षणात् ।
धिङ्मामीदृशमस्थिरं; तव दयायत्ता मम ह्यायतिः
श्रीलक्ष्मीपतिसेविताङ्घ्रियुगल ! श्रीकालहस्तीश्वर ॥ १७

मत्ताः क्ष्मापतयः समेऽपि, निरयः तत्सेवनं भीकरं,
तद्देयाः चतुरङ्गयानतुरगीभूषास्त्रियश्च व्यथाः ।
आश्रित्यालमिमान्, गतोऽस्मि महतीं तृप्तिं, न कांक्षामि तत्
ज्ञानोपार्जनशक्तिमेव वितर श्रीकालहस्तीश्वर ॥ १८

नैपुण्येन विमर्शनेऽपि भवदीयाद्यन्तवित्तिर्न मे,
नाप्याहूय करोषि तां मम, किमु व्यर्थैः तदर्थैः श्रमैः ।
क्षीरे मज्जय मां जलेऽपि यदिवाऽहं त्वां प्रपन्नः प्रभो !
श्रीरामार्चितपादपद्मयुगल ! श्रीकालहस्तीश्वर ॥ १९

ईप्सा चेत्तव दुर्लभं न पललं, हस्ते मृगो वर्तते,
तीक्ष्णश्चापि कुठार ईश, निटले वह्निः, जलं मूर्ध्नि च ।
एतैस्तत्पचनं विधाय निपुणं नाश्नन्कपाले किमि-
त्युच्छिष्टं शबरात्तदादित भवान्? श्रीकालहस्तीश्वर ॥ २०

राजा सन्नघवानभूदधिपतिर्नक्षत्रतारानिशां
पीडामक्ष्णि च राजराजपदगः प्रापत्कुबेरः पराम् ।
नष्टोऽभूत्स सुयोधनोऽपि नृपराट्शब्देन साकं निजैः
धिग्धिग्राजपदं द्विषोऽपि न भवेत् श्रीकालहस्तीश्वर ॥ २१

राजा चेद्धनलोलुपः क भवनं धर्मस्य? का वा गतिः
तत्तद्वर्णविधेः? कथं च भविता सौख्यं नृणामर्हताम् ।
पण्यस्त्रीनिचयस्य कश्च शरणं? भक्तास्त्वदीयाः कथम्
विस्रब्धं भजनं भजेयुरनिशं श्रीकालहस्तीश्वर ॥ २२

ऊर्मिः, पैप्पलपत्र, मूर्जिततमादर्शो, मरुद्दीपिका,
खद्योतो, मृगतृष्णिका च, करिणः कर्णाचलं, चाक्षरम् ।
आकाशे लिखितं च, जीवितं; अथ ज्योत्स्नापयःपिण्डकं
भूतिः; लोलुपता कुतोऽत्र भवति? श्रीकालहस्तीश्वर ॥ २३

विश्वासो न हि मे परेषु भवतीवान्यो भवन्तं विना
न भ्राता पितरौ गुरुर्यदपि वा बन्धुर्महापत्सु मे ।
तातोत्तारयसे कदा जनमिमं संसारदुःखार्णवं?
ब्रह्मानन्दजलाशयं च नयसि? श्रीकालहस्तीश्वर ॥ २४

लभ्या चेत्तव चत्वरेऽपि वसतिः भैक्षं ममालं प्रभो
सेवा मे न हि रोचते नृपपशोर्लाभे निधीनामपि ।
मामाशागुणबद्धमेव विदधन्मा संसृतौ पातयेः
दासत्वेन परिग्रहेच्छुरसि चेत् श्रीकालहस्तीश्वर ॥ २५

आख्यां ते भवदङ्घ्रितीर्थमपि, ते निष्ठ्यूतताम्बूलम-
प्याहारं विनिवेदितं च भवते, स्वीकृत्य पुत्रोऽस्मि ते ।
वात्सल्यात्परिपालयैनमनिशं, नेहे परापत्यतां,
संग्राह्योऽस्मि, न चात्तहानमुचितं श्रीकालहस्तीश्वर ॥ २६

तातम्बेति मयोच्यमानमनिशं त्वय्येव सर्वेश्वरे
विश्रान्तं न तु जन्मकारण इति स्वान्तेऽवगच्छ प्रभो ।
माता मे जनको गुरुश्च न परः, सर्वेऽपि ते त्वं मम
त्रायस्वान्धमिमं भवान्धतमसात् श्रीकालहस्तीश्वर ॥ २७

पुत्राभावकृतं विवेकरहिताः गच्छन्ति शोकं परं
किं नासन् शतपुत्रकाः कुरुपतेः ? काभूद् गतिस्तस्य तैः ।
किं वासीदनपत्यकस्य शुकमौनीन्द्रस्य नीचैः स्थितिः ?
मोक्षं नैव रुणद्धि पुत्रविगमः श्रीकालहस्तीश्वर ॥ २८

बाधन्ते किमु दुर्निमित्तनिवहा दोषा ग्रहाणां च तान्
ये त्वच्छोभननामधेयमनघा उच्चारयन्त्यन्वहम् ।
किं निर्वापयितुं क्षमा नु शलभाः संख्यातिगाः पावकं ?
त्वत्सेवानिरता भवन्ति सुखिनः श्रीकालहस्तीश्वर ॥ २९

आत्मत्राणपरायणोऽन्यपथगान्नोपैमि पृच्छेच्छया
जिज्ञासुः भवदंघ्रिसेवकजनानेवोपसर्पाम्यहम् ।
मुक्तांस्त्वद्भजनाद्विलोकितवतः कस्मान्ममान्याश्रयः ?
किं काङ्क्ष्यं त्वदनुग्रहे सति मम ? श्रीकालहस्तीश्वर ॥ ३०

मत्तेभास्तुरगा रथाश्च मणयो हर्म्याणि चान्दोलिकाः
चित्रा वस्त्रततिर्विलेपनचयो रामा न मोक्षप्रदाः ।
हृद्येषां समपेक्षया नृपगृहद्वारे प्रतीक्ष्यानिशं
कालोऽज्ञैर्बत गम्यते भुवि मुधा श्रीकालहस्तीश्वर ॥ ३१

योषाभ्यो विजुगुप्समानमपि न प्राप्तुं जुगुप्सां क्षमं
चित्तं, मुञ्चति मोचनेच्छु न सुखं, विच्छिन्ददीहालतां ।
छेत्तुं न प्रभवत्यहो, न कुरुते पूजां चिकीर्षत्तव;
त्राणेच्छुर्यदि दर्पमस्य निजहि श्रीकालहस्तीश्वर ॥ ३२

कत्यब्दान्न मया स्थितं ? सुविदितं किं वा मयासीत्तदा ?
रक्ष्यः कश्च ? भवन्तमेव सुदृढं ध्यायामि; लभ्या कदा ।
ब्रह्मानन्दरसानुभूतिरथ मे कीदृग्भवेदायतिः ?
मा कार्षीर्विमनायमानमव मां श्रीकालहस्तीश्वर ॥ ३३

आसन्नं मरणं विदन्नपि मृतेर्भीतः परित्रायते
को मां वैद्यवरो गदात् ? प्रकृतिगं कुर्याच्च किं भेषजम् ?
के देवास्सदया मयीति विलपन्नैव स्मरेत्त्वामहो
जीवश्राद्धविधानवानपि यतिः श्रीकालहस्तीश्वर ॥ ३४

रम्यस्वर्णमुखीनदीतटविरूढाम्राटवीमध्यतो
वेदीस्निग्धशिलातले स्थिरधियः पद्मासनस्थस्य च ।
त्वत्साक्षात्करणात्सदा मम हृदि प्रादुर्भवत्येव यत्
तत्सौख्यं न तु सम्पदामनुभवात् श्रीकालहस्तीश्वर ॥ ३५

कण्ठे दारभरं निबध्य विरचय्यासिन्नपत्यव्रजं
तस्योद्वाहविधिं विधाय महतायासेन तस्मिंस्ततः ।
तुच्छे बान्धवभावनाम्नि जनतासंभ्रान्तये प्रेमणि
स्त्रीकीलं दृढतावहं निदधिषे श्रीकालहस्तीश्वर ॥ ३६

देहं शाश्वतिकं विधेहि, यदि वा जन्मान्तरं वारय,
द्वे एते यदि कर्मणी न सुशके स्पष्टं तदेवोच्यताम् ।
शक्ये चेदथ तत्प्रसीद गदितुं; लब्ध्वेव ते सेवया
कारुण्यास्पदतां यतेऽनुभवितुं श्रीकालहस्तीश्वर ॥ ३७

भूपः कोऽपि महायुगानि धरणेः द्विःसप्त गोप्ताभवत्
कोऽप्यन्यः सकलां चकार सुचिरं स्वाज्ञाविधेयां भुवम् ।
तल्लक्ष्मीपरिणामदुःस्थितिकथाः श्रुत्वापि दर्पं स्वकं
हातुं न प्रभवन्ति भूपहतकाः श्रीकालहस्तीश्वर ॥ ३८

भूपत्वे समुपस्थितेऽनुपदमेवापैति किं वा दया
धर्मश्चाभिजनश्च सत्यवचनं क्षान्तिः सतां रक्षणम् ।
सौजन्यं कृतवेदितात्पवचने विश्वास एवं न चेत्
पातस्यास्य न हेतुरेव भविता श्रीकालहस्तीश्वर ॥ ३९

ये पूर्वं किल मोक्षराज्यपदवीमूर्धाभिषिक्तास्त्वया
धन्यैस्तैस्सदृशोऽहमित्यभिदधे जानान; एतद्यथा ।
लूतासर्पकिरातमत्तकरिणां दोषैर्युतोऽहं समैः;
द्रष्टुं त्वां न तु पारयामि त इव श्रीकालहस्तीश्वर ॥ ४०

सर्पालंकरणश्च कृत्तिवसनश्चारण्यचारी भवान्
व्यालेभेंद्रकिरातसंस्तुतिशुचां स्थानेऽभवन्नाशकः ।
कं योगं विनिधाय चेतसि सहातिक्षुद्रया लूतया
कैवल्यास्पदमेव तामकुरुत श्रीकालहस्तीश्वर ॥ ४१

भुक्तास्वप्यमराङ्गनासु भजते तृप्तिं न कामो मम,
प्राप्ते ब्रह्मपदेऽपि तुष्यति मदीयाशा न सर्वातिगा ।
क्रोधाग्नेर्मम सर्वलोकदहनेऽप्यायाति शान्तिर्न वा
नेहे भद्रमिहास्तु मे तव दया श्रीकालहस्तीश्वर ॥ ४२

वीतासून्प्रति शोचनं जनचयस्यैवंविधार्थं हि यत्
प्रेताधीश! वयं भवन्तमचिरादायाम एतद् ध्रुवम् ।
संदेहस्य लवोऽपि नेति शपथः तीर्थे तदा स्नास्यतः;
कुत्स्या आन्तरमर्थमस्य न विदुः श्रीकालहस्तीश्वर ॥ ४३

दुःखं यद्भवजं त्वदङ्घ्रिजलजस्यापास्यते सेवया
क्षुद्राणां धरणीभुजां कथमिदं नाश्यं भवेदाश्रयात् ।
शाम्यन्ती किमजागलस्थकुचतो दृष्टा बुभुक्षा शिशोः
मातुः प्रस्नुवतः स्तनादिव भुवि श्रीकालहस्तीश्वर ॥ ४४

ये शश्वत्समुदीरयन्ति शुभदं ते नाम तेषां ध्रुवं
दम्भोलिः सुमतामुपैति हिमतामग्निस्तथा सागरः ।
भूभावं सखितां रिपुर्गरलमप्येत्येव पीयूषतां
आख्या ते स्ववशीकरोति सकलं श्रीकालहस्तीश्वर ॥ ४५

किं न स्युर्गहनेषु कंदफलमूलाद्याः, महीध्रे गुहाः,
आपो निर्झरिणीषु, पल्लवमयाः शान्ताश्रमे प्रस्तराः ?
किं न स्याः प्रविरागिणां हृदि दयाविष्टान्तरङ्गोऽवितुं ?
राज्ञां सेवनकांक्षिणो बत जनाः श्रीकालहस्तीश्वर ॥ ४६

जन्मान्यापमहं पुरा कति तदा मोहादकार्षं कृतीः
काः का इत्यपि चिन्तयन्सुनिपुणं जाने न तद्वास्तवम् ।
जन्मैतन्न परं ममेति मतिमारूढस्य जन्मान्तरं
भक्तस्यास्य जनस्य वारय विभो श्रीकालहस्तीश्वर ॥ ४७

यावत्तिष्ठति भूतले मम तनुः तावद्रुजादुःखतो
रक्षित्वा करुणार्द्रवीक्षणयुतो मां त्वत्प्रपन्नं कुरु ।
सन्यस्ताखिललौकिकार्थनिचयं त्वत्पादपंकेरुह-
न्यस्ताशेषमनःप्रवृत्तिमनिशं श्रीकालहस्तीश्वर ॥ ४८

पूर्णो मूत्रमलैर्मनोजनिलयो द्वारं सुषुम्ना नु किम् ?
राजी रोममयी च कुण्डलिरपि स्यादम्बुजं किं मुखम् ?
षट्कंजानि कराक्षिपादयुगलं ? फालं कलेन्दोः ? रतिः
योगः किं ? तरुणीर्भजन्ति हि मुधा श्रीकालहस्तीश्वर ॥ ४९

शृङ्गारादिरसाभिषेकसलिलैः वाचाप्रबन्धैः सुमैः
शब्दार्थध्वनिवाद्यसुन्दररवैश्चालंक्रियाभूषणैः ।
ओजःकान्तिगुणैः प्रदीपततिभिः माधुर्यभोज्यैरपि
प्रीत्यार्चन् भवतः करोमि भजनं श्रीकालहस्तीश्वर ॥ ५०

स्तोतव्यं भवतः कथं नु तदलं रूपं निवृत्तोपमं
प्रत्याप्तुं न हि काव्यवाक् प्रभवति व्यंग्यार्थशोभावहा ।
रम्यालंकरणैः गुणैरपि युता तस्मात्तयालं प्रभो
धिग् धिग्मादृशदुर्विदग्धनिवहं श्रीकालहस्तीश्वर ॥ ५१

सक्षीरं सगुडं च भोजनमिदं वत्स त्वया गृह्यातां
पित्रोरित्युदितं निरस्य कदलीमात्रं फलं दीयताम् ।
ईप्सामीदृशमात्मसूनुकथितां तौ पूरयेतां यथा
वात्सल्याद्वितरेप्सितं मम तथा श्रीकालहस्तीश्वर ॥ ५२

स्वप्नोऽसौ शकुनं ग्रहव्यतिकरः सामुद्रिकं लक्षणं
पीडा रोगकृता विधेर्विलसनं भूतादिकावेशनम् ।
शोकस्याप्यभिभूतिरित्यसुचये प्रीतिं विधायास्थिरे
बाधान्प्राणिततेर्बहूञ्जनयसि श्रीकालहस्तीश्वर ॥ ५३

त्वद्भुक्तं निदधाति मूर्ध्नि कुसुमं भूतिं ललाटे च यः
निर्माल्यं गलसीम्नि गंधनिचयं नासाग्रभागे कृती ।
कुक्ष्यन्तर्मधुराशनं च परमो भक्तस्स ते सर्वदा
कैलासे सखितां गतो विहरति श्रीकालहस्तीश्वर ॥ ५४

दारापत्यसुहृद्धिता: वितरितुं शक्ता अभीष्टानि न:;
तत्सेवां प्रविहाय ये खलु निजं कालं भवद्ध्यानत: ।
आविर्भूतसुखा: चिरं गमयितुं शक्ता विना तान् श्रिय:
केभ्य: संचिनुषे प्रदित्सुरमिता: श्रीकालहस्तीश्वर ॥ ५५

भूपा मां रसिका अथापि कृपणा: कोपात्तुदेयुर्यदा
त्वत्पादांबुरुहे तदैवशरणं गच्छामि मा मां त्यज ।
कैलासप्रभुतां सरोजसदनं क्षीरार्णवोपाश्रयं
मन्ये स्वल्पमनुग्रहं तव विभो श्रीकालहस्तीश्वर ॥ ५६

रूप्याद्रि: वृषभश्च कीकसमयी माला कपालं तथा
व्याघ्रत्वग्भसितं भुजंगमततिश्चैतन्मदीयं धनम् ।
मा गात्सोदरवृन्दमंशत इति स्वात्मा विना तं कुत:
एकश्चाद्वय इत्यसौ न विनुति: श्रीकालहस्तीश्वर ॥ ५७

आम्नायाभ्यसनाच्च दर्शनचयस्यालोडनाच्चान्तत:
तत्त्वस्यापि विचिन्तनात्क्षरमिदं देहं स्थिरं ब्रह्म च ।
जानीमो वयमित्यसत्यवचना गोष्ठीषु ये दम्भत:
किं ते चित्तजयोत्थनिर्वृतिविद: ? श्रीकालहस्तीश्वर ॥ ५८

त्वन्मात्राश्रयणाद्गतेषु नियतं नि:श्रेयसं केषुचित्
कुक्ष्यर्थं विचरन्ति ये खलु सदा किं तैरिदं न श्रुतम् ।
आयुर्मात्रमिहान्नदं जनिमतां वेदैर्यदुक्तं पुरा
न त्वां द्रष्टुमलं भवान्ध्यनिहता: श्रीकालहस्तीश्वर ॥ ५९

औद्धत्येन महेश्वरं सुमशरे जेतुं सयत्ने सति
प्रक्रान्तो निटलेक्षणोऽपि सहसा दग्धुं हठाद्दर्पकम् ।
तन्मध्यस्थितिदुर्गतानव जनान् प्रस्पर्धयोन्मृद्नतोः
वत्सान्मत्तमहोक्षयोरिव मिथः श्रीकालहस्तीश्वर ॥ ६०

सर्वं संशय एव देहघटनं, सर्वं विचारास्पदं
सर्वं दुःखपरम्परान्वितमहो कायो भयभ्रान्तिकृत् ।
सर्वं चात्मशरीरपोषणमसद्व्यापारसिद्ध्यै नृणां
ध्यातुं त्वामुपयान्ति नैव मनुजाः श्रीकालहस्तीश्वर ॥ ६१

संतुष्टो नितरामहं मनसिजद्वारोत्थसौख्यैरलं
शान्तश्चाप्यभवं भृशं धरणिपद्वारोत्थसौख्यैरलम् ।
लिप्से शांतिमहं प्रदर्शय निजद्वारोत्थसौख्यानि मे
चिंतापेतमिमं कुरुष्व सदयं श्रीकालहस्तीश्वर ॥ ६२

अन्यस्तोत्रपराङ्मुखत्वनियमोपेतानुकारा जनाः
पुत्रीपुत्रकलत्ररक्षणधिया भूपाधमानर्हताम् ।
आपाद्याभिलषन्ति सेवितुमिदं तेषां नु किं साम्प्रतं
नैषां श्लाघितुमुत्सहे हि चरितं श्रीकालहस्तीश्वर ॥ ६३

ब्रह्मानंदमहावने निदधतो ये नादघंटारवं
बिंदुं दीपततिं कलादिनिचयं विज्ञानसंसाधनम् ।
शक्ता वारयितुं गतिं विचरतः चेतःकुरङ्गस्य तैः
छिद्यन्ते भवबन्धदुष्टलतिकाः श्रीकालहस्तीश्वर ॥ ६४

याचे त्वां न किमप्यहं, यदि तथा मत्तः त्वया गम्यतां
मह्यं ते कविता न रोचत इति प्रोच्येत चेत्तच्छृणु ।
जिह्वायाः प्रकृतिर्ममेयमसकृन्निष्कामतः प्रार्थनं;
कामार्थी लभते कथं तव पदं श्रीकालहस्तीश्वर ॥ ६५

कीराः किंशुकरम्यपुष्पनिचयं दृष्ट्वा फलभ्रान्तितः
तस्यादानसमीहया निकटगाः वंध्यश्रमाः स्युर्भुवि ।
एवं कर्मकलागिरां खनिषु ये शास्त्रेषु सप्रत्ययाः
ब्रह्मज्ञानयुता भवन्ति न हि ते श्रीकालहस्तीश्वर ॥ ६६

नूनन्यान्विनिहत्य तत्पदगता इच्छन्ति ये जीवितुं
किं ते मृत्युवशं न यान्ति ? विभवस्तेषां न किं नश्यति ?
नित्यं ते सकलत्रपुत्रसुहृदः किं निर्विशेयुः सुखं ?
जातानां मरणं भविष्यति न किं ? श्रीकालहस्तीश्वर ॥ ६७

त्वत्कारुण्यपदं नरोऽधमगृहं नाभ्येतुमिच्छत्यपि
व्याहर्तुं कृपणं वचः परजनं नोपेत्यपायेष्वपि ।
दंभस्यापि परिग्रहं न कुरुते देवान्तरं न श्रितः
वैवश्यं न शुचापि याति विषमे श्रीकालहस्तीश्वर ॥ ६८

सोढव्या न हि शत्रुभिर्विरचिता द्रोहा मया ज्ञातिभिः
पित्रा सत्यमिदं शपे, प्रतिकृतिः स्वल्पापि दोषाय हि ।
मत्वैवं विरतस्ततः कृतमतिः संन्यास आसं ध्रुवं
वैरं नैति हृदस्तु, का मम गतिः श्रीकालहस्तीश्वर ॥ ६९

विद्यास्वान्तमधीतिनो वयमिति स्वैरप्रलापिष्वहो
विद्वन्मानिषु संशयाख्यगहने मार्गात्परिभ्रश्यतः ।
कामक्रोधमहाकिराततितिभिः निर्भर्त्स्यमानस्य मे
चित्तात्स्वास्थ्यमपैति पालय विभो श्रीकालहस्तीश्वर ॥ ७०

हृद्रोगी विजुगुप्सते खलु कुतः, का सा जुगुप्सापि वा ?
किं वा लिम्पति, लेपनं च किमिदं ? देहा मदापूरिताः ।
छन्नं किं प्रविमोहपूरितभवे प्रच्छादनं स्याच्च किं ?
किं कार्यं करणं च ? सर्वमफलं, श्रीकालहस्तीश्वर ॥ ७१

श्रीशैलेशमहं प्रभुर्न भजितुं काञ्चीविभुं सेवितुं
काशीनाथमुपैतुमप्यथ महाकालेश्वरं वन्दितुम् ।
मत्वा मेरुसमं मदीयमणुवन्निस्सारभूतं गुणं
पाहि स्वीयकृपाकटाक्षविसरैः श्रीकालहस्तीश्वर ॥ ७२

आचार्यत्वमुपाश्रितो भुवि चरेत्, श्रीपादतीर्थं ममा-
दत्स्वेत्युक्तिमनुग्रहादपि वदेत्, प्राणार्थदेहादिकम् ।
शिष्यस्यापि निजं ममेति निगदेत्, वित्ते जुगुप्सां वहन्
विद्वांस्त्वां न भजेत्त्वसंगमनसा श्रीकालहस्तीश्वर ॥ ७३

मायाजाण्डकरण्डकोटिमिह केऽपिंषन्निजैर्नर्तनैः ?
के वाऽजय्यमनोभवं समदहन् ? के वा निरास्थन् श्रियम् ।
प्राणिप्राणभुजङ्गमृत्युरथ कैर्जिग्ये निरायासतः ?
मोक्षं दद्युरमी जनाः कथमिव ? श्रीकालहस्तीश्वर ॥ ७४

आघ्रातुं स्वदितुं विलोकितुमपि स्प्रष्टुं ग्रहीतुं ध्वनिं
जंतून्किं सृजसि त्वदीयभजनायाकुर्वतः ताः क्रियाः ।
नूनं त्वेष तवेन्द्रजालमहिमा कालातिवाहं निजं
प्रेप्सोः स्वीयविनोदनेन; किमतः ? श्रीकालहस्तीश्वर ॥ ७५

घोरं प्राक्चरितं मम स्मृतिपथं यातं जुगुप्सां वहेत्,
भीत्यै स्युर्मरणानि चिन्तनवशादेष्यन्त्यतीतानि च ।
आत्मानं स्वकृतीश्च संस्मृतवतः संजायते मे भयं
कालोऽप्याग्रथते बतान्धतमसैः श्रीकालहस्तीश्वर ॥ ७६

पर्यालोच्यत मन्त्रतन्त्रनिचयश्चादर्शि सम्यङ्मया
विद्वद्दर्शितसांख्ययोगहृदयं, श्रुत्यागमाः पाठिताः ।
लेशेनाप्यपयान्ति नैव मनसः शंकास्तु, का मे गतिः ?
श्रद्धां मे धिषणां स्थिरां च वितर श्रीकालहस्तीश्वर ॥ ७७

पुण्यान्याचरितानि पूर्वपुरुषैः कार्याण्यसूयालवो
विध्वस्तानि विधाय दुर्मदयुताः पापानि ये कुर्वते ।
दैवं तान्न हसेत्किमन्यपुरुषाः तान्नानुकुर्वन्ति किं ?
धिग्धिग्भाविदुरन्ततांध्यमसतां श्रीकालहस्तीश्वर ॥ ७८

दत्ते किं नु वराटमात्रसुखमप्याशापदं संसृतिः ?
किं कामान्वितरत्यसौ ? किमनुयात्यात्मानमारादपि ।
कीर्त्यै किं नु भवेत् ? अघान्यपनुदेत्किं ? दर्शयेत्त्वां च किं ?
धिक्त्वां, तत्स्पृहणं निहंसि न कुतः ? श्रीकालहस्तीश्वर ॥ ७९

कायोऽसौ सहते न हीषदपि चेन्न्यूनं सकृद्भोजनं,
छायामाश्रयते रवेश्च चकितो, वर्षे विशत्यालयम् ।
शीतार्ता भजतेऽनलस्य निकटं, किं सौख्यमस्माद्भवेत् ?
काङ्क्ष्यो नैष, जुगुप्स्य एव मनुजैः, श्रीकालहस्तीश्वर ॥ ८०

केदारादिसमस्ततीर्थगमनं कार्यं कुतो मानवैः ?
काशीत्वं भजतेऽङ्गणं हि सततं, कुक्षिश्च कैलासताम् ।
प्राप्ते ते चरणाम्बुजव्यतिकरे दिव्यप्रभावे विभोः;
एतावन्न विदन्ति मर्त्यहतकाः श्रीकालहस्तीश्वर ॥ ८१

मोहेनान्यधनाङ्गनापहरणोद्युक्तं मदीयं मनः
घोरं तत्क्षणमेव दासनिवहैः कृत्वा गृहीतं निजैः ।
भक्तिज्ञानविरक्तिरज्जुविहितैः पाशैः दृढं निर्दयं
पादस्तम्भनिबद्धमेव रचय श्रीकालहस्तीश्वर ॥ ८२

ब्रह्माणं न विगर्हयेत, धरणीलोके तु कस्मादसौ
धीचातुर्ययुजः ससर्ज विदुषः? सृष्टा च तेषां कुतः ।
क्षुद्बाधां समचीक्लृपत् ? यदि च तत्कृत्यं तदा दुर्धियो
राज्ञः किं जनयां बभूव ? धिगहो ! श्रीकालहस्तीश्वर ॥ ८३

बिल्वस्यैकदलेन ये खलु जनाः त्वत्पूजनेनार्जितं
पुण्यं नैव विदन्त्यपूपपृथुकैः सूपेन भक्तेन च ।
सक्षीरेण सशर्करेण महतायासेन दैवान्तरा-
ण्यर्चित्वा विफला भवन्ति बत ते श्रीकालहस्तीश्वर ॥ ८४

चेतोनिम्बमहीरुहस्य हि धनं स्यादालवालो जलं
सङ्गः संसरणे मदोऽङ्कुरमथासत्यं पलाशोच्चयः ।
दुर्वृत्तिः कुसुमं फलं मनसिजव्यापारकोपादिकं
रक्षास्योत्खननाच्छूतं जनमिमं श्रीकालहस्तीश्वर ॥ ८५

यः काव्यं रचयेद्भवत्परतया, तत्कारयित्वा परैः
यो ब्रूयात्सततं पठामि तदिति, त्वत्कीर्तनं तत्स्वयम् ।
इष्टापूर्तविधौ सभक्तिहृदयोऽधीते च यः श्रद्धया,
बन्धुर्मे स स एव, नान्यमनुजः श्रीकालहस्तीश्वर ॥ ८६

संपद्वर्गमनिर्गमय्य, षडरींश्चांतर्जयित्वात्मनः,
काङ्क्षाश्चाप्यनिवर्त्य दोषनिचयं नीत्वा न विच्छिन्नताम् ।
बन्धादीनविदार्य, यौवतवयोहावानसंस्तभ्य चा-
जित्वा भूततर्तिं. कथं नु तव धीः? श्रीकालहस्तीश्वर ॥ ८७

दास्येनाश्रयणं महीपतिततेरर्थाय किं वा सुखं?
किं वा दुस्तरसंसृतिप्रतरणे साह्यप्रदातुस्तव ?
अव्याजानिशसेवनं सुखमिति ज्ञातुं जना नेशते
घोरांहश्चयवीतबुद्धिविभवाः श्रीकालहस्तीश्वर ॥ ८८

पूर्वेद्युश्च पुरा ततोऽप्यविरतं पश्यन्ति किं नो मृतान्?
अर्थेष्वेवमपि त्यजन्ति न जना आशां निधौ निःस्ववत् ।
वीक्षेरन् किमु ते भवन्तम्? अथवा देवान्तराराधकाः
नेक्षेरन् शृणुयुर्न मर्त्यहतकाः श्रीकालहस्तीश्वर ॥ ८९

वर्णः कृत्तिगतः, तवाभ्यवहृतिः हालाहलः प्रीतिदा,
पात्रं पाणिगतं कपालमपि ते, भोगी च हारो गले ।
विज्ञायापि तवेदृशीं स्थितिमहो प्रेयान्नमायाः कथं
चेतस्त्वं समयूयुजत्तव पदे ? श्रीकालहस्तीश्वर ॥ ९०

सर्वद्वारतलेषु कञ्चुकिचये दण्डैर्विविक्षूञ्जनान्
दोरन्तर्विदयं प्रहृत्य बहुधा निन्दत्यपीमं पुनः ।
संप्रार्थ्यार्थजिघृक्षया नरपतीन्संसेवितुं यान्ति न
त्वत्पादाश्रयणार्जितस्थिरपदाः श्रीकालहस्तीश्वर ॥ ९१

भिक्षा किं न वितीर्यते प्रतिपुरं ? वस्तुं गुहाः स्युर्न किं ?
किं वस्त्रं सुलभं भवेन्न पथिषु ? प्राप्यं स्रवन्त्यां न किम् ।
शीतस्वच्छजलं ? तपोधनजनं संरक्षितुं नासि किं ?
कस्मात्क्षुद्रनृपान् श्रयन्ति मनुजाः श्रीकालहस्तीश्वर ॥ ९२

आहुः केऽपि कृपां कुरुष्व न इति त्वां पूजयन्तोऽन्वहं;
नातिक्रामति मोदकः परिमितिं पिष्टस्य यद्वत्तथा ।
भक्तिर्यत्परिमाणिका फलमपि स्यात्तावदेवेत्यतो
नेहे निर्वृतिमर्चनं तव विना श्रीकालहस्तीश्वर ॥ ९३

ओंकारः प्रणवः परः स हि यदाकारादुकारस्ततो
वर्णो मश्च भवेत्तदा समुदितः स्यादात्मनां तारकः ।
एतस्यैव जगद्भवेत्परिणतिः, तत्रैव लीनौ सदा
नादो बिंदुरपि, त्वमेष कथितः श्रीकालहस्तीश्वर ॥ ९४

त्वद्भक्तेषु सहस्रधापि भजनैस्त्वां याचमानेषु किं
कार्पण्यं बिभृषे ? कुतो न वितरस्येभ्यो मनोऽभीप्सितम् ।
किं भव्यं परिचिन्तयात्र; परमार्थस्य प्रदाने तव
श्रीभाण्डारपरिक्षयः किमु भवेत् ? श्रीकालहस्तीश्वर ॥ ९५

आदौ मोक्षमदादुदारहृदयो भक्त्या भजद्भ्यो भवान्;
लोभो मोह इति द्वयं हि जरया साकं प्रवर्धेत यत् ।
तत्सत्यं समपद्यत त्वयि; न चेदेवं कुतस्त्वन्मनाः
त्वद्भक्तः समुपेक्षितोऽस्ति भवता श्रीकालहस्तीश्वर ॥ ९६

दिक्चेलावृत ! नाम ते यमगृहद्वारे कवाटो भवेत्,
प्राण्यायुःपरिमाणनिर्णयकरो यश्चित्रगुप्तः श्रुतः ।
तज्जिह्वाफणिताक्ष्यतामुपगतं, प्रेतेशदंष्ट्रागिरेः
दम्भोलिश्च; तदेव मेऽस्तु शुभदं श्रीकालहस्तीश्वर ॥ ९७

लोकक्षोभकरक्षितीशशतजं सौख्यं न मे रोचते;
मध्यस्थं सुखदुःखयोर्वितरणप्रेमक्षमाशालिनम् ।
एकं दर्शय मे यथार्थनृपतिं यं त्वामिवाहं विदन्
विन्देयं सुखमन्ततः प्रतिदिनं श्रीकालहस्तीश्वर ॥ ९८

प्रेतान्किं न विलोकते स्वपितरौ वृद्धांश्च शश्वन्नरः ?
दारापत्यहिताः मृतं निजजनं शोचन्ति सर्वे कुतः ?
भेतव्यं मरणात्किमस्ति ? किमिदं दुःखं ? कुतो नार्चति
स्वान्ते त्वामभयप्रदानचतुरं श्रीकालहस्तीश्वर ॥ ९९

आख्यानं स्वकुलस्य, सेवनम्, असत्यार्थस्य सृष्टिः, स्पृहा
न्यायापेतयशोधने, पिशुनता, हिंसाकृतौ रक्तता ।
मिथ्याभाषणमित्यकार्यनिवहोऽन्यस्वापहारेच्छया;
तिष्ठेद्भूतिरियं कियच्चिरमिह श्रीकालहस्तीश्वर ॥ १००

दुष्टैः कैरपि संगतः त्वमकरोः दुष्टानि कार्याण्यतः
त्वामग्राह्यमहं ग्रहीतुमपि नेच्छामीत्यपेहीति च ।
उक्त्वा निर्गमितस्त्वयापि सदनाद्वल्मीकलंबी जनः
कस्मादेष न दीयतेऽभिलषितं श्रीकालहस्तीश्वर ॥ १०१

भस्मोद्धूलनधूसरा गुरुजटाभारोन्नमन्मस्तकाः
सम्यक्साधितपञ्चवर्णरसना वैराग्यभाजोऽनिशम् ।
संतुष्टास्तपसि स्थिता अवितथा रुद्राक्षमालाभृतो
ये केऽपि स्युरमून्भजामि मनसा श्रीकालहस्तीश्वर ॥ १०२

फुल्लांभोजमनोहरं सुमधुरं किं स्याच्छिलायां जलम् ?
किं दृश्येत कदापि विप्रवसतिः चण्डालवाट्यां भुवि ?
ये केचिन्न गुणा मयीति नितरां द्वेषो न कार्यस्त्वया
रम्यान्सत्सु गुणान् गृहाण सदयः श्रीकालहस्तीश्वर ॥ १०३

एकस्यामथवा द्वयोर्घटिकयोः त्रित्वाद्युपेतासु ता-
स्वस्मिन्नेव दिने परेद्युरपि वा वर्षात्परं कर्हिचित् ।
कायो नः पृथिवीतले विनिपतेद्धर्मं न जानीमहे
विघ्नो नापि भवत्पदाब्जभजनं श्रीकालहस्तीश्वर ॥ १०४

लोकेऽस्मिन्दुरवापतां कथमियात्स्तंबेरमाश्वादिकम् ?
का वा स्याद्गणना विमानविजितामान्दोलिकानां ततेः ।
वस्त्रालंकृतियोषितोऽपि सुलभास्त्वत्पादयोस्सेवने
पंकेजातविजेतृपादयुगल ! श्रीकालहस्तीश्वर ॥ १०५

अन्तर्नेत्रतयात्मदर्शनवशात्तादात्म्यसौख्ये सति
स्वच्छा अम्बुजचारवो जितलसद्विद्युल्लतानर्तनाः ।
कन्दर्पेषुविजिष्णवश्च जगतीत्यालोकयन्ते सदा-
नात्मज्ञास्तरुणीमनोहरदृशः श्रीकालहस्तीश्वर ॥ १०६

अद्भिर्यश्चुलुके धृताभिरथवैकेनापि पुष्पेण वा
श्रद्धाभक्तियुतः समर्चति जनस्त्वामेष धन्यो भुवि ।
प्राप्नोतीह वियद्धुनीशशिकलासङ्गं ततो दुर्लभं
त्वत्सङ्गं; महिमा किलैष भवतः श्रीकालहस्तीश्वर ॥ १०७

केचिद्रज्जुभुजंगवत् , रजतविभ्रान्तिस्फुरच्छुक्तिवत् ,
भास्वच्चंद्रशिलाजपाकुसुमरुक्सांगत्यवत्सर्वदा ।
इत्याकारगिरां प्रयोगकुशलाः दुर्मेधसश्चित्सुखं
ज्ञातुं न प्रभवन्ति तर्करसिकाः श्रीकालहस्तीश्वर ॥ १०८

दक्षः किं न हतः ? स्वदूषणरतो ब्रह्मा न किं दण्डितः ?
स्वीयाङ्घ्रिप्रणतापभाषणरतोपेक्षा न ते साम्प्रतम् ।
आत्मात्मीयविभेदधीर्हि भवतः सर्वज्ञ जाता कथम् ?
नैवं चेत्किमुदास्यतेऽत्र भवता श्रीकालहस्तीश्वर ॥ १०९

जघ्ने येन गजासुरः तव कराद् भ्रष्टस्स शूलो नु किम् ?
निर्वाणस्तव फालनेत्रदहनो दग्धा रतीशस्य किम् ?
हन्यन्ते न यतोऽपवादनिरताः, एतत्तु किं साम्प्रतम् ?
कां ते चक्रुरिमे परामुपकृतिं श्रीकालहस्तीश्वर ॥ १११०

युद्धं दूत्यकृतिश्च दुर्गमगदंकारत्वचोरक्रिये
नौवाणिज्यमुपाश्रयश्च धरणीपालस्य मन्त्रो महान् ।
सिद्ध्यैषां सुमहत्फलं हि भवति; स्युश्चेदिमान्यन्यथा
भूतिस्स्याद्विगता, व्यपेयुरसवः, श्रीकालहस्तीश्वर ॥ १११

सूते यस्तनयं निधिं च कुरुते निर्माति देवालयं
विप्रस्योद्वहनं प्रकल्पयति चादत्ते कृतेर्भर्तृताम् ।
रम्यस्वच्छजलाशयं च निखनत्युद्यानरोही भवेत्
लोकं याति स न त्वदीयसुलभं श्रीकालहस्तीश्वर ॥ ११२

भूभृद्वर्य ! समागतः कविरिहाद्य त्वां दिदृक्षुर्महान्
निर्माता रसवद्गभीरवचसामाश्वेव विद्वन्मुदे ।
सामार्थ्यप्रतिभानवान्प्रियवचा इत्युक्त एषोऽधमो
दृष्टः पूर्वमपैत्वसाविति वदेत् श्रीकालहस्तीश्वर ॥ ११३

कुर्वे नैव मदीयरम्यकवितां त्वत्तः परस्मै भुवी-
त्याबद्धं वसनाञ्चलं, गुरुतमाकारि प्रतिज्ञा मया ।
हस्तेऽधारि च कंकणो, मम तथाप्यङ्गान्यनीशान्यहो
कालस्योपनता विलोमसरणिः श्रीकालहस्तीश्वर ॥ ११४

स्वैरं त्वामभिपूजयन्नविरतं ज्ञानाख्यमोक्षासनाद्
गोष्ठीं यो न करोति किं तु कुजनैस्सख्याद्विनष्टार्जवः ।
भूपालभ्रुवरोषभाजनतया तत्सान्त्वनं काङ्क्षति
स्नेहेनानलशान्तये स यतते श्रीकालहस्तीश्वर ॥ ११५

दन्तानां पतनात्पुरैव, दृढताभाज्येव काये स्थिते,
कान्ताद्वेषणलक्ष्यतानुपगमे, पूर्वं जरोपस्थितेः ।
अभ्यासौ च तनावपूर्वविकृतेः, केशेषु कृष्णेषु च,
त्वत्पादाम्बुजचिन्तनं वितनुयात् श्रीकालस्तीश्वर ॥ ११६

# श्रीदाशरथिशतकम्

॥ श्रीः ॥

# श्रीदाशरथिशतकम्

* श्रीरघुराम ! चारुतुलसीदलदाम ! शमक्षमादिशृ-
ङ्गारगुणाभिराम ! जगतीस्तुतशौर्य ! रमाललाम ! दु-
र्वारकबन्धराक्षसविराम ! जगज्जनकल्मषार्णवो-
त्तारसमाह्व ! भद्रगिरिदाशरथे ! करुणापयोनिधे ॥ १

राम विशालविक्रम पराजितभार्गवराम सद्गुण-
स्तोम पराङ्गनाविमुखसुव्रतकाम विनीलनीरद-
श्याम ककुत्स्थवंशकलशांबुधिसोम सुरारिदोर्बलो-
द्दामविराम भद्रगिरिदाशरथे करुणापयोनिधे ॥ २

अगणितसत्यभाष शरणागतपोष दयालसज्झरी-
विगतसमस्तशोष पृथिवीसुरतोष त्रिलोकपूतस-
द्गगनधुनीमरन्दपदकंजविशेष मणिप्रभाधगद्-
धगितविभूष भद्रगिरिदाशरथे करुणापयोनिधे ॥ ३

रङ्गदरातिभङ्ग खगराजतुरङ्ग विपत्परम्परो-
त्तुङ्गतमःपतङ्ग परितोषितरङ्ग दयान्तरङ्ग सत्-
त्सङ्ग धरात्मजाहृदयसारसभृङ्ग निशाचराब्जमा-
तङ्ग शुभाङ्ग भद्रगिरिदाशरथे करुणापयोनिधे ॥ ४

---

* आद्यं श्लोकाष्टकं प्रत्ययांशदन्यत्र यथामूलमेव ॥

श्रीद सनन्दनादिमुनिसेवितपाद दिगन्तकीर्तिस-
म्पाद समस्तभूतपरिपालविनोद विषादवल्लिका-
च्छेद धराधिनाथकुलसिन्धुसुधामयपाद नृत्तगी-
तादिविनोद भद्रगिरिदाशरथे ! करुणापयोनिधे ॥ ५

श्रीरमणीयहार सजलाम्बुदनीलशरीर भक्तमं-
दार विकारदूर परतत्त्वविहार समस्तचेतनो-
द्धार दुरन्तपातकवितानविदूर खरादिदैत्यका-
न्तारकुठार भद्रगिरिदाशरथे करुणापयोनिधे ॥ ६

दुरितलतालवित्र खरदूषणकाननवीतिहोत्र भू-
भरणकलाविचित्र भवबन्धविमोचनसूत्र चारुवि-
स्फुरदरविन्दनेत्र घनपुण्यचरित्र विनीलभूरिकं-
धरसमगात्र भद्रगिरिदाशरथे करुणापयोनिधे ॥ ७

कनकविशालचेल भवकाननशातकुठारभूत स-
ज्जनपरिपालशील दिविजस्तुतसद्गुणकाण्ड काण्ड-
संजनितपराक्रमक्रमविशारद शारदकन्दकुन्दच-
न्दनघनसारसारकथ दाशरथे करुणापयोनिधे ॥ ८

नत्वार्यान्रघुनाथभट्टरगुरुं ध्यात्वा च बद्धाञ्जलिः
स्तुत्वा सत्कविशेखरान्स्वकृतिनिर्विघ्नावसानादतः ।
वक्ष्येऽहं शतकं भवत्परतया सद्वत्सल स्वीकुरु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ९

लोभाद्यद्रचितं पुरा कुजनसन्तोषाय काव्यं मया
सोऽयं स्याद्बदरक्रयो विरचितस्सन्मौक्तिकैर्मुक्तिद ।
जिह्वायां मम नृत्य दत्तरसवच्छब्दाशयस्सन्ततं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १०

काकुत्स्थान्वयवारिधौ तव सुधासूतेः पवित्रं शुभं
पादाम्भोजयुगं सुगन्धिविकचैर्नीलोत्पलैश्चम्पकैः* ।
सद्वृत्तैर्वचनैस्तनोमि विहिताभ्यर्चं प्रसीद प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ११

निर्दोषं सगुणं विभूषणयुतं काव्यं रसैः पूरितं
काव्यास्वादचणान् सचेतस इवाप्राज्ञान्किमावर्जयेत् ।
स्यन्दन्ते किमु चन्द्रकान्तमणिवद्ग्रावाण इन्द्वंशुभिः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १२

भास्वद्वंशज ! शक्तियुक्तिरहितस्यामुष्य दुष्टोक्तिभि-
र्भूयिष्ठापि भवत्कथा त्रिजगतीं पूतां विदध्याद् ध्रुवम् ।
किं कालुष्यवती पुनाति न जगद्वक्रा च भागीरथी
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १३

घोरांहश्चयसागरस्य दहनस्संशोषणो बाडबः
संसारार्तिदवानलस्य च सुधासारोऽभिधानं तव ।
पापोपज्ञदुरन्तदुर्मतमहाटव्याः कुठारः खरः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १४

---

*मूलस्थानि पद्यानि उत्पलमाला, चम्पकमाला चेति वृत्तविशेषयोः निबद्धानि ॥

शर्वाणीशिवयोर्विभीषणमहाभक्तस्य मन्त्रो महान्
द्रौपद्याः करिणश्च गौतममुनेस्सत्या विपद्बान्धवः ।
जिह्वायां मम ते पवित्रममलं नामानिशं नृत्यतु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १५

प्रेताधीशनियुक्तकिङ्करगणे प्राप्य स्थिते प्राङ्गणे
कण्ठारोधिनि मृत्युकालजकफे स्वीये जने रोदिनि ।
सन्दिग्धं तव नामकीर्तनमतः कर्तव्यमद्यैव तत्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १६

कारुण्यालय ! दुःस्थितावन ! रमाकान्तेति नित्यां स्मृतिं
प्राप्तानां सुधियां पदाम्बुजरजो मूर्ध्ना मया धार्यते ।
मा तान्गात कदाचनेति शमनो रुन्धे ब्रुवन्किङ्करान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १७

स्रष्टुश्चापि पितासि राम ! सनकादीनाञ्च तत्त्वं परं
मौनीन्द्रद्विजसत्तमादिमुजनस्येष्टा कुले देवता ।
श्रेष्ठश्चासि दिवाकरान्वयमहीपालेषु ताक्ष्यर्ध्वज !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १८

विद्वद्रक्षक ! सर्वपापहरणोद्योगानिशव्यापृत !
ब्रह्मेन्द्रादिसमस्तदैवतनमस्योद्देश्यदिव्याकृते !
त्वत्कीर्तिप्रमदागले सुकवितामाला मदीयार्प्यते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १९

श्रीदेवीं धरणीसुतां निजपरीवारं जनं वैष्णवं
भद्राद्रिं परमं पदञ्च विरजां गोदावरीनिम्नगाम् ।
कुर्वन् चेतनतारणाय वसुधालोकेऽवतीर्णो भवान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २०

अद्राक्षं तटिनीतटं वसतिरप्यालोकि भद्राचले
पृथ्वीजा ददृशे त्वदायुधचयो वीक्षाम्बभूवे मया ।
सौमित्रिश्च विलोकितः त्वमपिचेत्येवं कृतार्थोऽभवं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २१

हालेनैति कृषीवलोऽभिरुचितं व्रीहिं क्षुधापीडितो
गङ्गायां लभते जलं सुमधुरं पान्थः पिपासार्दितः ।
पापस्त्वां शरणागतो विकृतिमच्चित्तोऽगमं स्वस्थतां
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २२

खाते तर्कखनित्रतोऽस्त्यधिगतस्तत्त्वस्थले यो निधी
रामाख्यस्सुचिरं पुरा सुमहता कष्टेन तं साम्प्रतम् ।
हस्तस्थं वितनोति भक्तसुलभं भक्त्याख्यसिद्धाञ्जनं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २३

रामः किल्बिषसंततेश्शमयिता संतोषहेतुः सतां
कामादिद्विषतां जये निजजनायाजस्रसाह्यप्रदः ।
त्राता साधुजनस्य देव इति ते पादाम्बुजेऽहं भजे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २४

त्वामुत्सृज्य भवन्ति ये जडधियो देवान्तराराधका-
स्ते नूनं सहकारजात्सुमधुरान्निम्बे फलेऽत्यादृताः ।
एकस्त्वं भजनीयतामुपगतस्त्वं चैव मोक्षप्रदः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २५

'रा' वर्णे वृजिनानि मर्त्यहृदयान्निस्सारयत्यक्षरं
रुन्धत्तत्पुनरागतिं 'म' इति संरक्षेत्कवाटीभवत् ।
नैवाज्ञैस्तव नाम कीर्तितमिदं; नोचेत्कुतोन्वापदः ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २६

सीताराम ! ककुत्स्थराम ! रघुवंशोद्धार ! लोकप्रिये-
त्येवं भेकगणा इवापि मधुरं पापापहं नाम ते ।
ये शश्वत्समुदीरयन्ति परमं त्वद्धाम गच्छन्ति ते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २७

मूढाश्शार्करमोदकाय तरुणीबिम्बाधरायापि च
क्षौद्राय स्पृहयन्ति ये मधुरतासीमान्तभूतं तव ।
पीयूषाभ्यधिकं न ते विदुरहो नाम्नो रसं श्रीपते !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ २८

अंहांसि द्विजराजयान ! भजतां त्वामद्रितुल्यानि किं
नो नश्यन्ति ? न निर्विशन्ति किमिमे भूतिं मघोनस्सदा ।
एभ्यः किं न ददाति मोक्षविभवो हस्तावलम्बं प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभग्यावधे ॥ २९

आस्वाद्यस्सितयान्वितः पयसि यस्सारो यथा भक्ष्यते
तद्वत्ते कमनीयरूपममृतं चित्ताख्यपात्राहितम् ।
दास्येनाञ्जलिना पिबामि तृषितो यत्नार्जितं राघव !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३०

दत्तेऽल्पेतरसम्पदस्तव सती, दूतो हनूमान्व्यथां
प्रोद्धूनोति, तवानुजो मम सखा शोके, शुभं नाम ते ।
पापघ्नं, महिमा विपत्सु शरणं ते वज्रसंनिर्मितं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३१

कल्पद्रुध्वजशङ्खचक्रकुलिशा बाणासनं चाङ्कुशो
रेखारूपतया वसन्त्यविरतं त्वत्पादपङ्केरुहे ।
दत्त्वा गौतमदारवत्तदधुना दीनस्य मे पालय
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३२

अम्भोधीनवगाह्य मन्दरगिरिं धृत्वा च पृष्ठे गुरुं
दंष्ट्रायां धरणीं विधार्य विबुधारातिं विदार्यापि च ।
दुष्टक्षत्रततिं निहत्य जगतां त्रातासि हे राघव !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३३

दुष्टोन्मूलयितुर्विपन्नशरणस्याचिन्त्यदिव्यायुधो-
दञ्चद्बाहुयुगस्य रामनृपतेर्नान्यत्समं दैवतम् ।
इत्युद्घोषणमातनोमि करिणो भेरीं समुन्नादयन्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३४

जानक्या नयनोत्पलामृतकरः प्रस्निग्धनीलाम्बुदो
वक्षोजाद्रिसमाश्रितो नववयःकान्तारहस्ती भवान् ।
नित्यं ते पदपङ्कजे मधुपतां प्राप्नोतु मे मानसं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३५

आदित्यान्वय ! भूतराक्षसपिशाचादेश्शरीरामय-
भ्रान्त्यादेश्च निवारकं तव पदाब्जाख्यं महापञ्जरम् ।
प्राप्तोऽहं शरणं शरण्य ! भवता नोपेक्षणीयोऽस्म्यहं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३६

पीयूषं चरितं पिबामि तृषितश्श्रीपादतीर्थं च ते
आस्वाद्या मम मङ्गलाकर ! भवन्नामस्स्रवन्ती सुधा ।
सङ्गं त्वद्गतचेतसां वितर मे नीचांश्च दूरीकुरु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३७

घोराकारकृतान्तकिङ्करततेराधिः शुभं नाम ते
दारिद्र्याख्यपिशाचघातकमहामन्त्रो विकुण्ठस्य च ।
द्वारोद्घाटि रघूत्तमोत्तम ! सदा त्वद्दासदासीजने
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ३८

विज्ञप्तिं शृणु मामिकां रघुकुलोद्भासिन्न संदृश्यते
मत्तो मत्ततरो जगत्सु सुदुराचारप्रसक्तः परः ।
त्वत्तो वा गुणवत्तरस्सुमनसां; त्वं मे गतिः केवलः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभग्यावधे ॥ ३९

माता त्वं भरणात् पिता च वृजिनापत्संतते रक्षणात्
वैद्यश्चासि दशेन्द्रियामयचयस्याजस्रनिर्मूलनात् ।
एवं चिन्तितमद्भितो भव भवाभावाय भक्तस्य मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४०

ब्रह्माण्डावलिमात्मकुक्षिकुहरे सृष्ट्वा तदन्तस्स्थितान्
जन्तून्स्थावरजङ्गमांस्त्वमसि संरक्षंस्तदीयः पिता ।
तत्सूनौ मयि पक्षपातवहनात्पापान् क्षमस्व प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४१

सद्योगीश्वरमानसाम्बुजरसास्वादी मिलिन्दो भवान्
त्वं कीरो मधुराकृतिर्धरणिजाबाह्वन्तरे पञ्जरे ।
मुक्तेस्त्वं च निधिर्भवद्विरहजं शोकं ममोन्मूलय
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४२

ज्ञातुं त्वां प्रभवन्ति किं न मनुजाः ? किं तेऽवरक्तोऽसि वा ?
यन्नापज्जलधौ शृणोषि वचनं त्वं मज्जतां प्राणिनाम् ।
सीताया अथवा न विस्मृतवतः पीडामुपेक्षा न ते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४३

स्वश्रोत्रज्वरहेतुतावककथाः पीयूषपूर्णाः पुरा
घण्टोच्चध्वनिभिर्निवारितवते नीचाय दत्तो वरः ।
यद्देयं करणत्रयस्तुतभवत्तत्त्वाय तद्देहि मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४४

प्राप्तास्वाहवपन्नगामयपिशाचापत्सु सीतापते !
त्वय्येवाहितचेतसः कृतधियः पार्श्वद्वये रक्षितुम् ।
राम ! त्वां च तवानुजं च कथयन्त्यत्यादरेण स्थितौ
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४५

सङ्ख्यातीतजनुर्महाब्धिमनिशं दुःखोर्मिमालाकुलं
नालं सन्तरितुं तितीर्षति जनोऽयं भक्तिनावा तव ।
भीतिं चाभयदानदीक्षित ! हरैतस्यार्हतां चिन्तयन्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४६

भूयोहश्चरणेऽपि पानकरसस्त्वन्नाम मे पावनं
जिह्वायास्समभूत्पुरा किल शुकः किं नाप पुण्यां गतिम् ।
अन्ते "राघव ! पाहि मा" मिति वदन् ; नित्यं तदेवास्तु मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४७

अन्यस्वापहृतिस्तथान्यतरुणीरक्तिः परान्नादनं
भात्यादौ मधुरं; नवेत्त्यनुपदं तद्दुर्विपाकं मनः ।
मृत्योः किङ्करबाधनादवसि मां कस्यां तरण्यां नयन्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ४८

घोराण्याचरितान्यकारि भगवद्भक्तापचारो मया
सख्यं चापि कृतं समं कुपुरुषैर्देवान्तराराधकैः ।
आगांस्येव विचिन्त्य मा तुद विभो ! त्वद्दासदासोऽस्म्यहं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभग्यावधे ॥ ४९

लोभादन्यधनाङ्गनापहरणोद्युक्तं मदीयं मनः
चोरं दास्यविवेकरज्जुविहितैः पाशैर्दृढं निर्दयम् ।
त्वत्पादारव्यसुरद्रुमस्य ललिते मूले बधान प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५०

काशीक्षेत्रविभूषणोऽसि न शिवः त्वन्नामसारस्यवित्;
नाहल्यास्मि तवाङ्घ्रिनीरजरजोमाहात्म्यसंवेदिनी ।
नाहं वापि विभीषणः सुविदितत्वत्सत्य; ईडे कथं ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५१

पात्रं पातकिनस्त्वदीयकरुणावृत्तेस्तथा ह्यश्मन-
श्चैतन्यं समभूदरेश्च धरणीराज्यं, च पुण्यं महत् ।
दुर्जातेर्महितात्मता कपिकुलस्याहो भवद्दातृता
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५२

दुर्वारा मम पापसन्ततिरहो ! किं चित्रगुप्तो लिखेत् ?
कं दण्डं विदधीत मृत्युरथ तद्भृत्याश्च कुर्युः कथम् ?
एतत्सम्भवनात्पुरैव भवता संरक्षणीयोऽस्म्यहं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५३

किं बन्धुश्शबरी तवास्ति यदियं सम्भाविता सीत्तथा ?
किं ते स्निग्धजनो गुहोऽपि यदयं त्वद्दास्यपात्रीकृतः ? ।
किं पापं मम यच्छृणोषि न नुतिं ? किं तादृशोऽहं न ते ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभग्यावधे ॥ ५४

दीनान्नानुगृहीतवान्कति जनान् त्वं दीक्षितो रक्षणे ?
वस्त्रालिं बहुलां प्रदाय किमु नारक्षः स्मृतो द्रौपदीम् ?
याच्ञां मे सदयं निशम्य नयनानन्दं विधत्से न किं ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५५

अभ्रश्याम ! दिदृक्षितोऽपि बहुधा नात्मा त्वया दर्श्यते
कोणे नाम निगूहसि क नु निजं लोकप्रसिद्धं महत् ।
भक्तेर्हेतुरिदं च पातकतरोः कुद्दालको राघव !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५६

नोपेक्ष्यं; भवतो दयालुचरितं मा भूदसत्यं प्रभो !
नोपेक्ष्यं; तव वर्तनस्य न भवेच्चाकीर्तिरत्राणजा ।
नोपेक्ष्यं; भवतारणी भव तरिः त्वत्सक्तचित्तस्य मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५७

अज्ञानाद्दुरितान्यकार्षमिति, मां त्रायस्व, मे त्वं पिते-
त्यन्यान्न प्रणमामि शीर्षत इति, त्वत्प्रेमभाजामहम् ।
दासानामविरुद्धदास इति, चावोचं क्षमस्व प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५८

दुष्टोऽसाविति दूषितोऽहमितरैः; दुष्टोऽहमित्यब्रवं,
विश्वत्राणपरायणे त्वयि भजाम्यन्यान्नहीत्यैरयम् ।
अत्रामुत्र सुखं ममास्तु न च वा; त्वन्नाम मे स्याद्गतिः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ५९

पर्याप्तं त्विदमेव यत्तव दयावर्षेण मां सिञ्चसि
प्रोन्माथं तत आतनोमि दुरितस्यामित्रनिर्मूलनम् ।
ईहानां च विनाशनं यमभटप्रोत्सारणं सन्ततं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६०

बाणस्ते जलधीनजीगमदहो सप्तापि संयुक्ततां;
धूलिस्ते पदपङ्कजस्य महिलां चक्रे शिलां दुर्भगाम् ।
वृत्तं ते द्रुहिणादिनिर्जरवचोऽतीतं कथं वर्ण्यते ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६१

सङ्ख्यातीतखुरारिमर्दनविधौ किं शक्नुयान्मर्कटः ?
शक्तस्यापि तनौ सुधाकिरणतां गच्छेद्दवाग्निः कथम् ?।
सीताया महिमा, तवापि करुणा, भाग्यं च दूतस्य तत् ;
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६२

देवश्रेष्ठ ! जगत्त्रयाधिप ! पुरारात्यादिदेवप्रभो !
भक्तानामपवर्गदानजनितामेयप्रतिष्ठानघ !
स्तौमि त्वां सततं त्वदीयदयया शाम्यन्त्वघान्यद्य मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६३

सत्वं ते सहजो गुणो हि, वसतिः पीयूषवारां निधिः,
सूनुः पद्मभवो, रमा च ललना, भूमिश्च सिंहासनम् ।
छत्रं ते गगनं, निशाकररवी नेत्रे च, शय्या फणी
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६४

चित्रं त्वच्चरणाम्बुबुजव्यतिकराद्योषा यदासीच्छिला;
चित्रं चापरमप्लवन्त गिरयो यत्सागराम्भश्चये ।
चित्रं त्वेतदतीव यत्कृतभवद्ध्याना विमुक्ता इह
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६५

त्वं दैवं जननी पिताच वरदो मित्रं गुरुश्चासि मेऽ-
प्येवं ध्यानपरायणं जनमिमं तन्वन्ति पापान्यहो ।
प्राप्तस्वान्तविकारदुर्गतिमितस्त्राता त्वमेकः प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६६

प्राप्ते वासवराज्यभोगदपदेऽप्याशा प्रशाम्येत्कथं ?
सौवर्णाचलतुल्यसम्पदमितः काचोऽपि नान्वेष्यति ।
पुण्याघानि मुधा भवन्ति न हि मे; तुष्टोऽस्मि; नेहे भवं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६७

विज्ञास्सूनृतवादिनश्च करुणापूर्णा अलुब्धा द्विजाः
गावो वीरपतिव्रताश्च निगमा भूमेर्धुरं बिभ्रति ।
वीक्ष्यैतानपि जानते नहि नराः कर्तुं परोपक्रियां
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६८

अम्भोधिं प्रविगाह्य नक्रभरितं मत्स्यावतारे पुरा
क्रोधोग्रो निगमापहारकलुषं हत्वा च तं सोमकम् ।
संरक्ष्य श्रुतिसञ्चयं सकरुणं धात्रे व्यतारीद्भवान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ६९

मन्थं मन्दरमद्रिमादिफणिनं रज्जुं विधायादरात्
दुग्धाब्धिं मथितुं सुरासुरगणे व्यापारयुक्ते भवान् ।
भूमिं कम्पवतीं विलोक्य धृतवान् कूर्माकृतिस्तं गिरिं
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे ॥ ७०

आवृत्तां कटवद्विधार्य धरणीमब्धौ निलीय स्थितं
वाराहीं तनुमाश्रितः त्वमवधीर्हेमाक्षरक्षःपतिम् ।
स्वायत्तां च महीं पुरेव धृतवान् शृङ्गे भवान्दक्षिणे
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे ॥ ७१

निर्भिन्नान्नखदन्तकान्तिरुचिरात्काष्र्णायसान्निर्गतः
स्तम्भाद्भीकरनारसिंहवपुषा हर्तुं स्वभक्तव्यथाम् ।
संहर्तुं च हिरण्यपूर्वकशिपुं प्रह्लादमाह्लादयः
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे ॥ ७२

धारिण्यां प्रथमं ततश्च गगने दत्त्वा द्वितीयं पदं
तार्तीयेन बलाद्बलेरवनतं भक्त्या शिरो नामयन् ।
देवेन्द्राय जगत्प्रभुत्वमददा भूत्वा वटुर्वामनः
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे ॥ ७३

हत्वा क्षत्रमहीपतीन् परशुना त्रिस्सप्तकृत्वोऽखिलान्
स्रोतोभूततदीयरक्तसलिलैस्सन्तर्प्य तातं हतम् ।
भूमिं भूसुरसाच्चकार विजितां रामो भवन्भार्गवः
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे ॥ ७४

हत्वा यज्ञविघातिराक्षसगणं भङ्क्त्वा धनुर्धूर्जटेः
पृथ्वीजां परिणीय काननभुवं गत्वा गुरोराज्ञया ।
अस्त्रैस्त्वं दशकण्ठकण्ठनिचयं छित्त्वा जगत् त्रातवान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ७५

कृष्णोऽभूर्यदुवंशवारिधिविधुर्जन्मान्तरे श्यामलः
दुष्टान्नाशयिता मुमुक्षुजनतां संरक्षिता गीतया ।
रोहिण्यास्तनयो बभूविथ तदा श्रीकृष्णसाह्याय च
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ७६

आसीस्त्वं त्रिपुराङ्गना वरयितुं बुद्धस्स्तुतो निर्जरैः
प्रादा बाणशरासनप्रमुखदिव्यास्त्रोत्करं शूलिने ।
मित्राय त्रिपुरासुरोच्चयविनिर्दाहे प्रसक्ताय च
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ७७

साङ्कर्यादिमहाघभाजनजगत्त्राणाय कल्क्याकृतिः
खड्गोदग्रकरो निरर्गलहयारूढो यथेष्टं चरन् ।
शिष्टालेरभयं विधास्यति खलस्तोमाज्जगत्यां भवान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ७८

ऊहापोहविनाशनात्कफरुजाग्रासाच्छरीरस्य च
प्रागेवावदधीत मोक्षपुरुषार्थोपार्जने मानवः ।
तादृग्यत्नमनाचरन्हि मनुजः स्वात्मोपघाती भवेत्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ७९

हृपाणां निलयो हि, संसृतिमहामोहद्विपस्याङ्कुशः,
सम्पद्भाण्डगृहं, समीहितनिधिर्निःश्रेयसस्याकरः ।
मार्गश्शत्रुजयस्य, नौरपि विपत्सिन्धौ, शुभं नाम ते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ८०

पापाख्यव्रतति भवासुखफलां श्रीरामनामायुधं
कुर्यात्किं सहसासहस्रशकलां छित्त्वा न रूढामपि ?
किं नोत्तुङ्गशिखोऽवलेढि शलभानासीदतः पावकः ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ८१

भक्त्या यः परया जितेन्द्रियचयो विष्णौ स एवोत्तमः;
योऽजस्रं करणोच्चयं प्रयतते जेतुं ह्यसौ मध्यमः ।
जिग्ये यः करणैस्तमाहुरधमं; त्रायस्व मामीदृशं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ८२

लोभात्स्पर्शसुखे द्विपो, रसनगाल्लौल्याद्विनश्येज्झषो,
गीत्या श्रुत्यभिरामया विषधरो, रूपप्रसक्त्या मृगः ।
सौरभ्यान्मधुपश्च; पञ्चविषयाकृष्टस्य मे त्वं गतिः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ८३

हस्तावञ्जलिबन्धने तव निजौ नेत्रे समालोकने
संस्मृत्यां रसनं श्रुती निशमने व्यापारयन्धीरधीः ।
त्वय्येवार्पितसर्वभारमहितो यस्तं जनं पालय
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ८४

एकं ते तुलसीदलं सुदृढया भक्त्यार्पयन् गण्यते
सर्पाधीशसुपर्णकुञ्जरसमस्मौलभ्यशालिन्! बुधैः।
नित्यं त्वच्चरणारविन्दनिरतैस्त्वद्धाम हस्तस्थितं
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे॥ ८५

प्राच्यामुद्गत एव भास्वति यथा चन्द्रानलौ ग्लायतो
लोकैकाधिपतौ तथोज्वलगुणे संशोभमाने त्वयि।
प्रक्षीणद्युतयो भवन्ति सकला अन्याः प्रभो! देवताः
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे॥ ८६

लोकाधीश! भवत्पवित्रचरितक्षीराम्बुधिं मोहतः
त्यक्त्वा स्नातवतो बहुष्वपि महातीर्थेषु पुण्येषु मे।
क्षाल्यन्ते कथमन्तरिन्द्रियमलाः? वन्ध्यश्श्रमः केवलं
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे॥ ८७

हेम्नोऽपैति यथा विना न दहने सन्तापनाच्छ्यामिका
तद्वद्दौष्ट्यविनाशदीक्षित! भवद्भक्त्यग्निसंयोगतः।
दुस्साधं प्रदहेर्मदायतिभिदं पापत्रयं दुर्मलं
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे॥ ८८

श्रीर्हेतुर्बहुलश्रियां तव सती, गङ्गा त्वदीया सुता
लोकान्पूततमान्करोति, तनयः प्राणान् प्रदत्ते विधिः।
कामान्कान्न भजेयुरीप्सिततमान् ये त्वां भजन्ते सदा?
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे॥ ८९

क्लिद्येर्किं जलबिन्दुभिः कमलिनीपत्रं जलान्तःस्थितं ?
पङ्के गाढतमे चरन्तमपि मृत्कीटं विलिम्पेत्स किम् ? ।
एवं संसृतिवासनाविरहितो गच्छेत्परं मानवः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ९०

पुष्टाङ्गः सजरं समीक्ष्य धरणीराज्यश्रियं चञ्चलां
स्वात्मीयं सकलं विहाय पुरतस्स्वीयान्प्रयातानपि ।
ये छिन्दन्ति न मोहपाशनिचयं तेषां गतिः कीदृशी ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ९१

ऋद्धौ विस्मृतिमेत्य सङ्कटगतः पुण्यानि कार्याण्यहं
नाकार्षं कथमित्यसावनुशयस्सर्वप्रकारैर्वृथा ।
गेहे वह्निगते तृषाभिभवने कोऽद्ध्यः खनेद् भूतलं ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ९२

पङ्कस्थो जलशोषणादविचलन् स्थानात्स्वकीयाज्झषः
जीवालम्बनमीहते पुनरपि क्षिप्रं यथा जीवनम् ।
एवं प्राप्यनिबद्धसुस्थिरमतिर्योगी भवद्भक्तितः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ९३

उद्भूतप्रतिशब्दघर्घररवं कुर्वन्कटुं दर्दुरः
फुल्लाम्भोजरसं न वेत्ति मृदुनिस्वानो मिलिन्दो यथा ।
नैवं ज्ञातुमलं मनस्सहृदयस्याज्ञस्सचेता इव
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ ९४

पर्याप्तोह्ययमेक एव तनयः पित्रोर्महाधन्ययोः
यः कुर्यान्न परिग्रहं परजनाद्द्याच्च सद्योऽर्थिने ।
सत्यं वक्ति च केवलं त्वयि निजे दैवे च यो भक्तिमान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १५

सीताराम ! रमेश ! राम ! महितज्ञानस्वरूप ! प्रभो !
पाहीमं जनमित्यजस्रमगतिः संप्रार्थये त्वां हृदि ।
तन्मे पापविनाशपूर्वककलाचातुर्यदानं कुरु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १६

धन्या सा शबरी भवन्तमकरोद्या भुक्तभुक्तोज्झितं
चिक्रोडः कृतरेख एति करजैः पृष्ठे त्वया धन्यताम् ।
भक्तानां कुलजन्मनी न गणिते वेदान्तवेद्य ! त्वया
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १७

श्रेष्ठो नानृतवाक् बिभेति न रिपोर्यस्स प्रवीरो मतः
दाता याचककामनाधिकतया दत्तेऽर्थितं यो भुवि ।
त्वय्येवार्पितभार एव कथितो निश्चिन्तचित्तः कृती
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १८

आहुर्लोकविदो द्विरेफवशगं कीटं द्विरेफाकृतिं
किं वाच्यं भवदुःखसन्ततितमोनिष्कासनाहस्कर: ।
स्वाभिन्नं वितनोषि मामिति विभो ! सङ्क्रामयन्स्वान्गुणान् ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १९

वृक्षाणां कुसुमं शलाटुफलतां गच्छत् क्रमाद् दृश्यते
त्वत्पादान्तिकगं तदेव वरिवस्यार्थत्वमापादितम् ।
आदौ धान्यगवादिसम्पदतुला निश्श्रेयसं स्यात्ततः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १००

पादौ भट्टगुरोश्शिरतावयवेपूर्ध्वाश्च पुण्ड्राः धृताः
मन्त्रस्ते स्ववशः कृतो यमभटास्सन्तर्ज्य दूरीकृताः ।
त्वत्पादाम्बुजबध्यमानमनसश्शान्तानि पापानि मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १०१

आत्रेयस्तनयश्च लिङ्गसचिवस्याध्वर्युवेदे शुचौ
शाखामाश्रित आदिमामकरवं कञ्चर्लवंशोद्भवः ।
गोपोऽहं कविसन्नुतः कृतिमिमां दासो भवत्कीर्तनीं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ॥ १०२

भद्राचलकृतवसतेर्दाशरथेस्तावकस्य शतकस्य ।
अनुवादं वरदकृतं भागवताः पठितुमर्हन्ति ॥

# वेमनशतकम्

शम्भोरुमापतेर्दास इति पात्रं जनस्तुतेः ।
उवाच वेमनो धीरो वेमेदं लोकमङ्गलम् ॥ १

युक्तं विज्ञाय वदतां न वयोभेद ईक्ष्यते ।
ज्वलेद्बालस्य दीपोऽपि श्रूयतां वेम विश्वद ॥ २

याच्यन्तां याचितुं योग्या दत्तात्काङ्क्षयं न चाधिकम् ।
अददानो न चाभ्यर्थ्यः श्रू ॥ ३

नास्थानेऽधिकता वाच्या नैच्योक्तेः स्वस्य न क्षतिः ।
किं नादर्शे नभोऽल्पं स्यात् श्रू ॥ ४

अल्पधीरधिकारस्थः सतो निष्कासयेद् ध्रुवम् ।
चर्म भुङ्क्ते न चेक्षुं श्वा श्रू ॥ ५

अल्पो वदति साटोपं प्रशान्तं सज्जनः पुनः ।
कांस्यवर्तिक स्वनेत्स्वर्णं श्रू ॥ ६

ये वदन्त्यनृतं शश्वत् तेषु लक्ष्मीर्न तिष्ठति ।
यथाम्भः शिथिले कुम्भे श्रू ॥ ७

# वेमनशतकम्

आचारः क्षुधयाऽपैति चित्तशुद्धिस्तमोभरात् ।
पूर्वधैर्यं विपद्भिश्च श्रू ॥ ८

दत्तं चेत्क्षुधितायान्नमीश्वरायेव सार्थकम् ।
रिक्तायेव कृतं दानं श्रू ॥ ९

आत्माशुद्धौ किमाचारात् चित्ताशुद्धौ शिवार्चनात् ।
पात्राशुद्धौ फलं पाकात् श्रू ॥ १०

निर्णयादक्षमाध्यस्थ्यं घटनापटुनैपुणी ।
अदातुस्सम्भ्रमो व्यर्थः श्रू ॥ ११

आशा सर्वत्र पापिष्ठा यतयोऽप्यनया जिताः ।
ग्रासत्यागी विशुद्धात्मा श्रू ॥ १२

वर्धते विभवो दातुः क्षीयते न कथञ्चन ।
कूपे तोयमिवोद्धारे श्रू ॥ १३

दातुर्दानमदाता स्वैः प्राणैर्वारयते सदा ।
लता दुष्टेव कल्पद्रोः श्रू ॥ १४

गृहे धनं ममैवेति लुब्धो रक्षति भूतले ।
न काचोऽप्येनमन्वेति श्रू ॥ १५

त्रेधाच्छिन्नमयस्तप्तं लोहकारेण योज्यते ।
मनस्तु भिन्नं नैकं स्यात् श्रू ॥ १६

दैवलोपात्सुखं नश्येत् समचित्तः ततो भवेत् ।
भृत्योऽभूद्द्विपदा पाथः श्रू ॥ १७

अदात्रा कारयन्दानं दात्रा दानविपर्ययम् ।
अलङ्घ्यो विधिरीशस्य श्रू ॥ १८

ईश्वरो विषमे ध्यातो न प्रसीदेत् वृथाश्रमः ।
कुतोऽसौ न सुखे दृष्टः श्रू ॥ १९

साधोरसाधुः सम्भूतः सादयत्यखिलान्वयम् ।
माधुर्यं मञ्जरीवेक्षोः श्रू ॥ २०

उद्धरत्युत्तमो वंशं मध्यमस्तमुपेक्षते ।
अधमस्तदधःकारी श्रू ॥ २१

कर्पूरक्षारयो रूपं तुल्यं भिन्नस्तु तद्रसः ।
पुण्यपापनरेष्वेवं श्रू ॥ २२

ऋणदाने भवेत्पूषा शोधनप्रार्थने यमः ।
उत्तमर्णोऽधमर्णस्य श्रू ॥ २३

सत्यासत्ये न विज्ञेये अतत्त्वज्ञातृभिर्जनैः ।
न व्याख्येये श्रुते एव श्रू ॥ २४

आशापिशाचिकाविष्टो बम्भ्रमीत्यवशो नरः ।
शुन एवोचिताशेयं श्रू ॥ २५

अधीतश्रुतविद्योऽपि न नीचो दोषमुज्झति ।
क्षीरान्नैल्यमिवाङ्गारः श्रू ॥ २६

विद्या सर्वा स्वधीतासीत् मृग्या सा चिन्तयोज्झिता ।
तत्त्वमेतद्विजानीहि श्रू ॥ २७

सेव्यमानं बहुक्लेशैः विश्वास्यं न हि राजकम् ।
सर्पस्नेहो हि तत्सङ्गः श्रू ॥ २८

ऊना हि महिषा गोभ्यो मूर्खत्वं तत्र कारणम् ।
कथं स्यान्निपुणो मूर्खः श्रू ॥ २९

विनेयस्स्याद्बलीवर्दो वर्षेणैकेन शिक्षितः ।
न तु मूर्खः शताब्दीभिः श्रू ॥ ३०

सर्वैर्बोध्यो विजिज्ञासुः मूर्खो न ब्रह्मणा पुनः ।
केनावक्रा नदी कार्या श्रू ॥ ३१

तीर्णो नदीं गतः पारं न पोतो वस्तुवाहकः ।
कृतार्था विमुखा हि स्युः श्रू ॥ ३२

ऐकमत्यमुपेयं नः तज्जास्स्युः सर्वसम्पदः ।
गजबन्धी गुणस्तार्णः श्रू ॥ ३३

पञ्चांगुलीभिर्हस्तस्य चेष्टा न त्वेकया विना ।
स्वीयनाशे बलं नश्येत् श्रू ॥ ३४

यैर्नाशश्चिन्त्यतेऽन्यस्य स्वीयं ते न विदुस्ततः ।
किं ते दैवहता न स्युः श्रू ॥ ३५

अकार्यं रोचतेऽज्ञाय लुब्धाय सरसं वचः ।
पङ्कं सूकरवृन्दाय श्रू ॥ ३६

अन्येन स्थापितं पक्षं क्षणेनैकेन खण्डयेत् ।
धाता तन्मण्डने नालं श्रू ॥ ३७

शर्कराक्षीरदं सर्पः न दशत्यनुधाव्य किम् ।
वर्जनीयस्सदा दुष्टः श्रू ॥ ३८

धनितायाः कुलीनत्वं स्थानं सा भोगभाग्ययोः ।
अधनस्य कुलं नास्ति श्रू ॥ ३९

भूषणैर्न हि दुर्गन्धः सुराकुम्भस्य शाम्यति ।
विद्ययेवासतो दौष्ट्यं श्रू ॥ ४०

अनार्येण समं स्नेहो महान्तमपि बाधते ।
मक्षिकेवोदरं प्राप्ता श्रू ॥ ४१

शुनको वृषभो न स्यात् मशको द्विरदोऽपि वा ।
लुब्धो दाता शशो व्याघ्रः श्रू ॥ ४२

सेवस्व स्वामिनं श्वेव काकवत्सौहृदं भज ।
रासभस्य क्षमाभ्येहि श्रू ॥ ४३

गोलांगूलैर्नवं वस्त्रं यथा दत्त्वार्च्यते कपिः ।
दुष्टो जनः तथा धूर्तैः श्रू ॥ ४४

आर्यता हीयते क्रोधात् दुःखं क्रोधाद्भवेद् भृशम् ।
आप्तकामो जितक्रोधः श्रू ॥ ४५

दर्वीमात्रं वरं गव्यं कुम्भमात्रं न गार्दभम् ।
भक्त्या दत्तं वरं चाल्पं श्रू ॥ ४६

भागीरथ्या गतिश्शान्ता क्षुद्रनद्यास्ससम्भ्रमा ।
सदसद्वर्तनं ह्येवम् श्रू ॥ ४७

खरः चन्दनलिप्ताङ्गः पद्भ्यां हन्ति यथा पुरा ।
मूर्खपूजाफलं ह्येतत् श्रू ॥ ४८

गुणिन्युपकृतेर्लेशो गिरिवद् गुरुतां भजेत् ।
विपरीतं भवेद्दुष्टे श्रू ॥ ४९

गुरुं विना भवेद् ज्ञानी ब्रह्मा तज्जनकोऽपि किम् ।
पेटिका कुञ्चिकोद्घाट्या श्रू ॥ ५०

दुधुक्षुर्धेनुकां वन्ध्यां पदृहर्ति न पयोऽश्नुते ।
लुब्धयाच्ञा तथा मोघा श्रू ॥ ५१

यथा कुम्भस्थितो दीपो जलपूर्णो घटो यथा ।
निर्विकारस्तथा धीमान् श्रू ॥ ५२

आनुकूल्ये कृशः श्वापि हर्यक्षमपि बाधते ।
प्रतिज्ञा विषमे व्यर्था श्रू ॥ ५३

चित्तशुद्ध्या कृतं पुण्यमण्वपि श्लाघ्यतां व्रजेत् ।
न्यग्रोधस्य कियद्बीजं श्रू ॥ ५४

विधिः नाशयिता दुष्टमापद्यपि न रक्षति ।
नोषरं श्लाघते स्वामी श्रू ॥ ५५

पादुकाश्मा श्रुतौ दंशः सूचिः पादेऽक्ष्णि रेण्वणुः ।
मर्मघाती गृहे पीडा श्रू ॥ ५६

अमाधुर्याद्यथा काष्ठतुल्य इक्षुर्भवेत्तथा ।
गुणहीनो बुधो निन्द्यः श्रू ॥ ५७

न हन्यात्प्राणिनं कश्चित् हन्याल्लोकभयङ्करम् ।
छिन्द्याद् वृश्चिकपुच्छाग्रं श्रू ॥ ५८

शत्रुमात्मवशं यातं हन्तव्यमपि संत्यजेत् ।
उपकृत्या तु तं हन्यात् श्रू ॥ ५९

जिघांसन्कुरुते राजा मानुषं प्रणयास्पदम् ।
स्वं गूहत्युरगो दंक्ष्यन् श्रू ॥ ६०

तैलाक्तं राजते चर्म व्यायामी बलमश्नुते ।
उत्कर्षं ज्ञानतो याति श्रू ॥ ६१

छत्राच्छायां यथोपैति सालम्बोऽस्ति गुरोर्यथा ।
ज्ञानी नरस्तथा शास्त्रात् श्रू ॥ ६२

असिनैव भवेच्छेदः कथं तन्मुष्टिना पुनः ।
अबुद्धेः किं बलात्तन्वाः श्रू ॥ ६३

स्वकुक्षेः पूरणे व्यग्राः ये जनाः प्राणिभिर्हतैः ।
आत्मवत् तान्न ते विद्युः श्रू ॥ ६४

जलाद्बहिर्मृतो मीनः प्रगल्भस्तु तदन्तरे ।
स्थानभ्रष्टो भवेदेवं श्रू ॥ ६५

मायिना सह संवासात् यात्यार्यो नीचतां ध्रुवम् ॥
पलाण्डुना यथा कुन्दः श्रू ॥ ६६

मायाविवञ्चनात्स्वं यः त्रायते स प्रवर्धते ।
ज्ञानी तत्त्वं विजानाति श्रू ॥ ६७

प्राप्तापदः प्रतीकारत् ज्यायसी प्रेक्ष्यकारिता ।
अजानन् जानतो विद्धि श्रू ॥ ६८

पौरोभाग्यभृतः सर्वे स्वयं दोषस्य भाजनम् ।
दोषं वक्ता न वेत्ति स्वं श्रू ॥ ६९

महत्यपि दरिद्रत्वे नाकार्यं कर्तुमर्हति ।
अनार्यत्वं ततो नान्यत् श्रू ॥ ७०

वरमेको मणिश्शुद्धो न काचा गणनातिगाः ।
अलमेको गुणी पुत्रः श्रू ॥ ७१

नक्रो जले द्विपं हन्ति हन्यते तु बहिश्शुना ।
स्थानाद्बलं न तु स्वस्य श्रू ॥ ७२

अज्ञंमन्यो भवेद्विज्ञः विज्ञमानी जडः पुनः ।
मौनवानुत्तमः ख्यातः श्रू ॥ ७३

नारब्धं लोभितोऽप्युज्झेत् न दानं कीर्तयेत् कृतम् ।
अदातारं न सेवेत श्रू ॥ ७४

शौण्डिकस्य गृहे पीतं क्षीरमाहुः सुरां समे ।
अस्थानावस्थितेर्निन्दा श्रू ॥ ७५

वामनः शबलः सर्पः आशा व्यर्था च निन्दिता ।
पाणिपादं तथा ह्रस्वं श्रू ॥ ७६

वाक्यमेकमलं साधु बहुभिः किं प्रजल्पितैः ।
त्रातैको देव एवालं श्रू ॥ ७७

किमदोषज्ञया बुद्ध्या भूत्या चास्वजनार्थया ।
वैद्येनाव्याध्यभिज्ञेन श्रू ॥ ७८

भुवं स्वीयां वदन्तं भूः अदातारं धनं हसेत् ।
कृतान्तश्च रणाद्भीतं श्रू ॥ ७९

दष्टं यत्पीडयेदास्यं मरीचं मलिनं बहिः ।
ईदृग्प्रीतिस्सतां लोके श्रू ॥ ८०

औदुम्बरं फलं रम्यं कीटगर्भं विदारितम् ।
भीरोर्धैर्यं कथं चित्ते श्रू ॥ ८१

अकृत्तकेशं चास्नानात् पूतिं मलिनवाससम् ।
विप्रमप्यन्यथा ब्रूयुः श्रू ॥ ८२

चोरो देवकुले चौर्ये सक्तचेता न दैवते ।
घटान्वेषी गृहे हि श्वा श्रू ॥ ८३

गोपो यदुकुले जातः कृष्णोऽनल्पयशा न किम् ।
गुणो न त्वन्वयो गण्यः श्रू ॥ ८४

समरे न वृथा भाव्यं लालनीयो न चानृती ।
गुरुर्न प्रत्यवस्थेयः श्रू ॥ ८५

रामेण स्वकुलं दीप्तं दग्धं तत् कौरवेण तु ।
आर्यानार्यौ जगत्येवं श्रू ॥ ८६

विनंक्ष्यद्राक्षसं राज्यमाक्रान्तं कपिसैनिकैः ।
क्षेष्यतोऽलं जयेऽल्पोऽपि श्रू ॥ ८७

आशास्वगणनीयासु विचरत्यवशो नरः ।
श्वतुल्यस्य किमन्यत्स्यात् श्रू ॥ ८८

लोभमोहौ विनिन्द्यौ हि सर्वं स्यात्तद्रतो वृथा ।
दैवं स्यात्प्रतिकूलं च श्रू ॥ ८९

वक्रदण्डमृजुं कुर्यात् पिंष्यात्सर्वगिरीनपि ।
न द्राव्यं कठिनं चेतः श्रू ॥ ९०

विद्या विनयहीना चेत् निःसूत्रायाः स्त्रियाः समा ।
सत्त्वेऽपि मणिभूषाणां श्रू ॥ ९१

अविद्वान् विदुषां पार्श्वे स्थितोऽपि न हि पण्डितः ।
बको न हंसः तत्पार्श्वे श्रू ॥ ९२

पिशुनोऽर्थीव नम्रस्सन् गर्तेऽन्यं पातयेज्जनम् ।
सर्वथा वर्जनीयोऽसौ श्रू ॥ ९३

महीरुहं यथा कीटो नाशयेच्च लतां कृमिः ।
तथैव गुणिनं दुष्टः श्रू ॥ ९४

औषधं भिषजा दत्तं विना व्याधिर्न शाम्यति ।
दीपेनैव तमोऽपैति श्रू ॥ ९५

शक्तेराराधने मूर्खाः प्राणिहिंसां वितन्वते ।
जन्तुभुक्सा कथं दैवं श्रू ॥ ९६

मुक्ता स्यात्पतितः शुक्तौ जलबिन्दुर्जले जलम् ।
क्षेत्रायत्ताः पदार्था हि श्रू ॥ ९७

अवज्ञेयो हि सान्निध्याद्विद्यानां पारगोऽपि सन् ।
ओषधिः प्राङ्गणस्थेव श्रू ॥ ९८

प्रगल्भमानो गर्वान्धः स्यादासन्ने क्षये जनः ।
निर्वास्यन् हि चलो दीपः श्रू ॥ ९९

सर्वा विद्या अधीत्यापि न दुष्टो याति पात्रताम् ।
वहन्निव खरः स्वर्णं श्रू ॥ १००

अहिंसा परमो धर्मः नात्तुं वध्या हि जन्तवः ।
किं जिघांसत्यपत्यं स्वं श्रू ॥ १०१

क्षमावानुच्यते साधुः न क्षमासदृशं भुवि ।
मङ्गलानां क्षमा योनिः श्रू ॥ १०२

आन्ध्रीनिबद्धकृतितः कविवेमनस्य
पद्यानि कानिचन लोकहितोपयुञ्जि ।
गीर्वाणवाचि परिवृत्तिमवापितानि
दोषा यदीह परिवर्तयितुर्न कर्तुः ॥

# श्रीकृष्णशतकम्

* श्रीरुक्मिणीश केशव नारदसंगीतलोल नगधर शौरे ।
वृन्दावनग जनार्दन वरद सदा पश्य मां सकरुणं कृष्ण ॥ १

त्वमेव माता च पिता त्वमेव त्वमाश्रयो मित्रमपि त्वमेव ।
त्वं मे गुरुर्दैवतमिष्टमेव स्वामी गतिश्च ध्रुवमेव कृष्ण ॥ २

* नारायण परमेश्वर धाराधर नीलदेह दानववैरिन् ।
क्षीराब्धिशयन यादव वरद सदा पश्य मां सकरुणं कृष्ण ॥ ३

पापानि सर्वाणि नृणां हरेतां द्वे अक्षरे अक्षर ते हरीति ।
अहो महत्ता तव पुण्यनाम्नः कथं स्तुवे त्वामखिलज्ञ कृष्ण ॥ ४

अजामिलः स्वं तनयं दुरात्मा नारायणेत्याह्वयतो जुहाव ।
तस्यापि रक्षा विहिता त्वयास्मिद्द्वेषु किं ते सदृशोऽस्ति कृष्ण ॥ ५

योषा पुरा कापि शुकं प्रियं स्वं श्रीरामनाम्नैव समाह्वयन्ती ।
निःश्रेयसं प्राप तव प्रसादात्किं हीयते त्वन्मनसां नु कृष्ण ॥ ६

---

* नक्षत्रचिह्नाङ्किताः श्लोकाः चतुर्थपादादन्यत्र यथामूलं निवेशिताः ।

# श्रीकृष्णशतकम्

* अक्रूरवरद माधव चक्रायुध खड्गहस्त यादववीर ।
शक्रादिदिविजसन्नुत शुक्रार्चित पश्य मां सकरुणं कृष्ण ॥ ७

नन्दस्य सूनुं प्रियमप्यसुभ्यो धर्तारमद्रेरपि मन्दरस्य ।
विष्णुं हरिं चित्तहरस्वरूपं मुनिस्तुतं त्वां प्रणमामि कृष्ण ॥ ८

कारुण्यवार्धे भवता मयीत्थं दत्तावलम्बे परिरक्षिते च ।
चिन्ताभिरन्याभिरलं ममेश देवेन्द्रदेवार्चितपाद कृष्ण ॥ ९

अवेदवेद्यः परमात्मरूपः त्वं पाहि पश्यन्दिशि मे मुरारे ।
सदा भवत्यर्पितसर्वभारं मां मज्जयोन्मज्जय वापि कृष्ण ॥ १०

यस्योदरे सन्ति जगन्ति लीनान्यमूनि चत्वारि दशाप्यनादे ।
कथं स देवक्युदरे स्थितस्त्वमणोरणीयानथ वासि कृष्ण ॥ ११

त्वां देवकी नक्तमजीजनत्सा गर्भेष्टमेऽहन्यपि रोहिणीगे ।
दुष्टस्य कंसस्य वधं विधाय लोकान्परित्रातुमनन्त कृष्ण ॥ १२

समस्तलोकाधिपतेस्तवेदं क्रीडास्थलं गोपपुरं बभूव ।
गोपी यशोदा समभूच्च धात्री स्तन्यप्रदात्री सकलेश कृष्ण ॥ १३

पादस्वनन्नुपुरकिङ्किणीकं पदानि चित्राणि विलासभाञ्जि ।
समर्पयन्नग्रत एव सत्याः नन्दस्य नृत्यस्यनवद्य कृष्ण ॥ १४

लिप्तः शरीरे हरिचन्दनेन बिभ्रत्करौ कङ्कणनिस्वनौ च ।
वक्षःस्थले कौस्तुभमादधानो बाल्यं वयो यापयसि स्म कृष्ण ॥ १५

तलेन पाणेर्नवनीतपिण्डं समुद्वहन्मूर्ध्नि च बर्हिबर्हम् ।
सन्मौक्तिकालंकृतनासिकस्त्वं बाल्यं वयो यापयसि स्म कृष्ण ॥ १६

बृन्दावने गोपगवादिपूर्णे मन्दारमूले स्वकरस्थवेणुम् ।
श्रोत्राणि लोकस्य च पूरयंस्त्वं बाल्यं वयो यापयसि स्म कृष्ण ॥ १७

ह्रदस्थकालीयभुजङ्गमस्य फणासु वह्वीषु कुतूहलेन ।
प्रनृत्यतस्ते भरतानुसारं ध्यायामि पादौ कमनीय कृष्ण ॥ १८

कृतावगाहे यमुनाप्रवाहे गोपीजने क्रीडति कौतुकेन ।
तदीयवस्त्रालिमपाहरस्त्वं किं युक्तमेतद्भवतो नु कृष्ण ॥ १९

क्रुद्धस्य देवेशितुरश्मवृष्टेः संरक्षितुं गोपगवादिसङ्घम् ।
उद्धृत्य गोवर्धनमातपत्रमपत्रपां तस्य चकर्थ कृष्ण ॥ २०

ब्रह्माण्डरूपैरपि कंदुकैर्यः खेलाविनोदं प्रभवेद्विधातुम् ।
कियत्तवास्योद्धरणं गिरीणामज्ञैः स्तुतः केवलमत्र कृष्ण ॥ २१

त्वं द्वारकायां निवसन्नगर्यां बिभ्रन्मनुष्यान्तरसाम्यमेव ।
विजज्ञिषेऽन्यैरवजज्ञिषेऽन्यैः स्वस्वाधिकारानुगुणं हि कृष्ण ॥ २२

चतुस्सहस्राणि चतुर्गुणानि गोप्यो बभूवुस्त्वयि सक्तचित्ताः ।
तावन्ति रूपाणि विधृत्य रम्याण्यारीरमस्ताः प्रियभक्त कृष्ण ॥ २३

यत्नेन सत्या प्रहितात्कुचेलाच्चेलाञ्चलस्थां पृथुकस्य मुष्टिम् ।
आदाय दत्तो विभवस्त्वयास्मै मित्राय बाल्येऽखिलमित्र कृष्ण ॥ २४

हे कृष्ण गोपालक दीनबन्धो त्रायस्व मां शोच्यदशां प्रपन्नाम् ।
इति प्रपन्नो द्रुपदस्य पुत्रीमक्षय्यचीरैरवसि स्म कृष्ण ॥ २५

ध्मातस्त्वदीयो युधि पाञ्चजन्यः सुमुत्थितेन ध्वनिनैव भिन्दन् ।
गर्भान्सुरारिप्रमदाजनस्य चक्रादि चक्रेऽक्रियमेव कृष्ण ॥ २६

त्वमुद्वहन्सारथिभावमश्वान्प्रचोदयंस्तोत्रकशादिभिश्च ।
रथं नयन्नाशु चकर्थ भीतिं द्विषां च पार्थस्य जयं च कृष्ण ॥ २७

न शक्यरक्षो भुवि शिष्टलोकः शत्रूंस्तदीयानविनाश्य दुष्टान् ।
इत्येव दुष्टक्षितिपान् जिघांसुः पार्थस्य सारथ्यमुवोढ कृष्ण ॥ २८

संरक्षितुं स्वाश्रितमिन्द्रसूनुं चक्रेण भीष्मं विनिहन्तुमैच्छः ।
न ते ह्यपूर्वः श्रितपक्षपातो नक्रो हतो येन गजाय कृष्ण ॥ २९

रामावतारे दिविजेन्द्रसूनुं हत्वा त्वयात्रायत सूर्यसूनुः ।
त्वमिन्द्रसूनोः परिरक्षणाय रवेस्तनूजं त्ववधीर्हि कृष्ण ॥ ३०

आसीदति द्रौणिशरे सुतीक्ष्णे मां पाहि पाहीत्यभिमन्युसूनोः ।
गर्भस्थितस्यैव निशम्य वाचमपालयस्तं करुणार्द्र कृष्ण ॥ ३१

सुखेन गण्या उडवो यथावद् भूरेण्वियत्ता सुवचा मनुष्यैः ।
अनन्तकल्याणगुणावधिं ते विदुर्न देवा मुनयोऽपि कृष्ण ॥ ३२

कल्पावसाने भुवनानि सर्वाण्याधाय कुक्षौ जलधौ शयानम् ।
पत्रे वटद्रो रमणीयमूर्तिं ध्यायाम्यकामं हृदयेन कृष्ण ॥ ३३

स्वर्णाचलस्त्वं ह्यचलेषु मध्ये वृन्दारकाणां च सुराधिनाथः ।
त्वं तारकाणामसि तारकेशो नृणां नृपश्चाप्यखिलेश कृष्ण ॥ ३४

विश्वस्य सृष्टिं विदधद्विधाता विष्णुस्तदीयस्थितिहेतुभूतः ।
जीर्णस्य तस्य प्रलयाच्च रुद्रः त्वं कर्मभेदाद्बहुधासि कृष्ण ॥ ३५

पीताम्बरश्चक्रधरोऽब्जनाभः चतुर्भुजश्शार्ङ्गधरो विनीलः ।
तार्क्ष्यध्वजो दीनजनावनस्त्वं सर्वाधिको मेऽसि शरण्य कृष्ण ॥ ३६

मत्स्याकृतिस्त्वं प्रविगाह्य सिन्धुं तं सोमकं तत्र निहत्य लीनम् ।
उद्धृत्य तच्चोरितवेदराशिं प्रत्यार्पयस्तं द्रुहिणाय कृष्ण ॥ ३७

मथत्सु दुग्धाम्बुधिमादरेण सुरासुरेष्वर्थिषु मन्दरेण ।
विश्वम्भराकम्पनिवारणाय कूर्मस्त्वमद्रिं तमुवोढ कृष्ण ॥ ३८

वराहरूपश्च हिरण्यनेत्रमावर्तितक्षोण्यपहारपापम् ।
मुदे सुराणां प्रशमय्य शृङ्गे त्वं दक्षिणे क्ष्मामदधाश्च कृष्ण ॥ ३९

कार्ष्णायसस्तम्भहतेरुदित्य विस्मापयन्द्रष्टृजनान्नृसिंहः ।
हिरण्यपूर्वं कशिपुं पुरा त्वं त्राणाय भक्तस्य जघन्थ कृष्ण ॥ ४०

पदत्रयाक्रान्तिमितं प्रदेशं संप्रार्थ्य लोकत्रितयं प्रसह्य ।
आक्रान्तवन्तं बलिनं बलिं च ह्रस्वं वटुं त्वां प्रणमामि कृष्ण ॥ ४१

दुर्दान्तभूपालशिरांसि वारानासन्नविंशान्परशोर्निजस्य ।
विच्छिद्य घातैर्भृगुनन्दनस्त्वं क्ष्मां कश्यपाय प्रददाथ कृष्ण ॥ ४२

दुष्टं दशास्यं प्रणिहत्य रामस्तदीयबन्धात्प्रतिनीतसीतः ।
अशास्तथा त्वं धरणीं यथाहू राजन्वतीं तां भवतैव कृष्ण ॥ ४३

महाबलौ धेनुकमुष्टिकौ यः स्वबाहुशक्त्या प्रविमर्द्य वीरौ ।
बलातिरेकाद्बलरामनामाप्यभूस्त्वमंशान्तरतश्च कृष्ण ॥ ४४

बौद्धावतारे कपटक्षितीशो भवन्सतीनां त्रिपुरासुराणाम् ।
भङ्क्त्वा व्रतं तत्पतिमारणे त्वं सहाय आसीर्गिरिशस्य कृष्ण ॥४५

धर्मे गतेऽस्तं कलिना सह त्वं कल्किस्समारूढसदर्पवाजी ।
दुष्टालिनाशं सुजनालिरक्षां विधास्यसे लोकहिताय कृष्ण ॥ ४६

पद्मायताक्ष प्रियभक्तसार्थं त्वमेव मूर्तित्रितये दयालुः ।
शक्ता न वक्तुं सनकादयस्ते गुणाननन्तान् शुभदान्हि कृष्ण ॥४७

आगस्सहस्राणि बहून्यकार्षं सदान्वतिष्ठं च महान्त्यघानि ।
अनात्मवेदी कपटप्रियोऽहं सुदुस्सहं मां विषहस्व कृष्ण ॥ ४८

द्विपात्पशुश्च प्रविमूढचित्तः पापास्पदं दोषसहस्रभाक्च ।
कियानहं बोद्धुमलं भवन्तं त्वमेव रक्षी च गतिश्च कृष्ण ॥ ४९

जनास्तरुण्या मुखमिन्दुरम्यं वक्षोजयुग्मं पृथुलं नितम्बम् ।
दिदृक्षवः तद्गतचेतसस्स्युर्नापि स्मृतिं तेऽभिलषन्ति कृष्ण ॥ ५०

अजस्रसक्तं विषयेषु निन्युः कदध्वनीमं जनमिन्द्रियाणि ।
अतीन्द्रियं त्वामधुनैव वेत्ति त्वद्भक्तसांगत्यवशात्स कृष्ण ॥ ५१

दुष्टः खलो मूढमतिश्च पापः ईर्ष्यालुरासक्तमनास्सुखेषु ।
कथं निषेवे स्थिरधीर्भवंस्त्वां मां पाहि वीतान्यगतिं च कृष्ण ॥५२

* कुम्भीन्द्रवरद केशव जम्भान्तकमुख्यदिविजसन्नुतचरित ।
अम्भोजनेत्र जलनिधिगम्भीर विपश्य मां सकरुणं कृष्ण ॥ ५३

प्रह्लादमत्रायत यः पितुः स्वाद्ररक्ष यः पाण्डुसुतानरिभ्यः ।
यः पालयामास शिलामहल्यां गोप्ता स तेषामिव मेऽस्तु कृष्ण ॥५४

श्रिया समेतो मकरं निहत्य यथा गजेन्द्रं समपालयस्त्वम् ।
उपात्तदैत्यारिनुतिस्तथा मामनन्यचित्तं परिरक्ष कृष्ण ॥ ५५

किमध्वरैस्तीर्थविगाहनैः किं व्रतैश्च किं किं मह्तिैश्च दानैः ।
भजन्ति ये त्वां न भजन्ति ये च तेषां च तेषां च रमेश कृष्ण ॥५६

लक्ष्मीपते त्वं पुरुषोत्तमोऽसि ब्रह्मादिदेवेडितसच्चरित्रः ।
मुरस्य शत्रुः द्विषत्सुहृच्च भक्तस्य मे त्वं वरदोऽसि कृष्ण ॥ ५७

विनिर्गतो दानवडिम्भरक्षां स्तम्भाद्यथा त्वं निरवर्तयः प्राक् ।
तथैव पद्मायतनेत्र दीनं मां पाहि कारुण्यनिकेत कृष्ण ॥ ५८

भास्वत्सहस्राधिककान्तियुक्तः सौन्दर्यसीमान्तरतीशतातः ।
अनन्तकल्याणगुणाकरस्त्वं मां पाहि कारुण्यनिकेत कृष्ण ॥ ५९

मन्दं सदा पापकृतौ रिरंसुं नीचं च पात्रं जनगर्हणानाम् ।
अनिन्द्यनन्दात्मज ! वीतशङ्को मां पाहि कारुण्यनिकेत कृष्ण ॥६०

* गजराजवरद, केशव, जगतीकल्याणरूप, देव, मुरारे ।
भुजगेन्द्रशयन, माधव, किरीटिसख पश्य मां सकरुणं कृष्ण ॥ ६१

हे दुष्टकंसान्तक हे मुरारे त्वमेव पापं मम हर्तुमीशः ।
न रक्षको मे त्वदृते परोऽस्ति त्वय्येव संन्यस्तभरोऽस्मि कृष्ण ॥ ६२

दुर्धीरहं दुष्कृतिप्रसक्तो दुर्दान्तमर्त्यैस्सह बद्धसख्यः ।
त्वत्प्रेमवारांनिधिमज्जनेन विनिर्मलं मां रचयाद्य कृष्ण ॥ ६३

* दुर्वारचक्रधरकर, शर्वाणीप्रणुतिविनुत, जगदाधार ।
निर्वाणनाथ माधव सर्वात्मक पाहि मां सकरुणं कृष्ण ॥ ६४

* सुत्रामनुत, जनार्दन, सत्राजिदपत्यनाथ, सौन्दर्यकला- ।
चित्रावतार, सूनो देवक्याः पाहि मां सकरुणं कृष्ण ॥ ६५

करीन्द्रमत्रायत यद्बलं प्राग्ररक्ष पुत्रीं द्रुपदस्य यच्च ।
यत्सूर्यपुत्रस्य बलं ममापि त्वं केवलस्तद्बलमीश कृष्ण ॥ ६६

स स्पर्शवेधी तनुते यथाऽयः कृष्णं स्पृशन्नेव सुवर्णलोहम् ।
त्वदीयनाम्नो महितस्य योगात्तथास्मि पूतः सुपवित्र कृष्ण ॥ ६७

सकृत्समुच्चारणमात्रतस्ते दिव्यस्य नाम्नो जनदुष्कृतानि ।
सद्यो विनश्यन्ति समूलमेवेत्यजामिलान्नो विदितं हि कृष्ण ॥ ६८

न वस्तु तद्यत्र न विष्णुरस्तीत्येवं ब्रुवाणे दनुजेन्द्रसूनौ ।
स्तम्भाद्विनिर्गत्य यदेनमावीः प्रह्लाद एतत्कथयेत्स कृष्ण ॥ ६९

*भद्रेभपूजितपद, सुभद्राग्रज सर्वलोकपालन शौरे ।
भद्राप्रिय केशव बलभद्रानुज पाहि मां सकरुणं कृष्ण ॥ ७०

भवान्यथात्रायत नागराजं प्रह्लादनायाप्यभयं व्यतारीत् ।
तथा प्रपन्नं परिरक्षतान्मामहो बत त्राणचणोऽसि कृष्ण ॥ ७१

त्वदीयवृत्तश्रुतिवर्जनाय घण्टानिनादप्रतिबद्धकर्णम् ।
तं राक्षसं चापि ररक्षिथ त्वं भक्तस्य दुःखानि कुतोऽस्य कृष्ण ॥ ७२

यद्यश्वमेधाहरणेन यष्टुः स्वर्गाधिवासाधिगमो ध्रुवं स्यात् ।
यज्ञेश्वरं त्वां भजतस्सदा मे किं दुर्लभं मोक्षफलं नु कृष्ण ॥ ७३

*हे पुण्डरीकलोचन हे भरताग्रज मुरहर हे रघुराम ।
हे त्रिपुरामित्रसुहृत् हे माधव पाहि मां सकरुणं कृष्ण ॥ ७४

यो हेमपूर्वं कशिपुं जघान ररक्ष तत्सूनुमथ स्वभक्तम् ।
अस्तावि देवर्षिगणैश्च स त्वं मा मा त्वदीयं विजहाहि कृष्ण ॥ ७५

*हे पुण्डरीकलोचन, हे पुरुषोत्तम मुकुन्द हे गोविन्द ।
हे भक्तकामधेनो हे भवहर पाहि मां सकरुणं कृष्ण ॥ ७६

छित्त्वाहवे यो दशकण्ठकण्ठान् लङ्काधिराज्येऽभिषिषेच सद्यः ।
विभीषणं स्वं शरणं प्रपन्नं ध्यायाम्यहं त्वां हृदयेन कृष्ण ॥ ७७

ग्रहादिबाधा न हि संभवन्ति, दुःखानि बिभ्यत्युपसर्तुमेव ।
त्वन्मानसानामपयन्त्यघानि, चिन्ताप्यचिन्त्या करुणार्द्र कृष्ण॥७८

भागीरथीपुण्यजलाभिषेकादिष्टस्य पूर्तस्य च संविधानात् ।
पुराणवेदाध्ययनात्फलं यन्न तत्समं त्वस्मृतिजेन कृष्ण ॥ ७९

कोदण्डपाणिः किल दण्डकायां तपोधनान्दृप्तनिशाचरेभ्यः ।
दुर्दान्तनक्राच्च यथा गजेन्द्रं मामेत्य संरक्ष तथैव कृष्ण ॥ ८०

रूपं निजं दर्शय दर्शनीयं ममान्यतोऽनेन निरुन्धि दृष्टिम् ।
पापं मदीयं प्रणुदाब्जनाभ ! त्वदेकचित्तोऽस्मि रमेश कृष्ण ॥ ८१

भवान्तकं देव तवाभिधानं निर्वर्तकं चाखिलनिर्वृतीनाम् ।
पीयूषपूर्णं तव नामधेयं स्मराम्यजस्रं हृदयेन कृष्ण ॥ ८२

ह्रस्वो लघुस्स्याद् भुवि याचमान इत्युद्वहन्वामनरूपमेव ।
पादत्रयन्यासमितं प्रदेशमयाचथास्त्वं बलिमाद्य कृष्ण ॥ ८३

हरन्हि दृष्टो नवनीतदुग्धे उलूखलाबद्धतनुर्जनन्या ।
विधेर्गुरुं बाल इति भ्रमन्त्या त्वं क्रुद्धया क्रीडितवांश्च कृष्ण ॥ ८४

महीयसस्ते महतोऽपि देव न नाम संग्राह्यमगौरवेण ।
पापानि विध्वंसय मे रमेश त्वं कृत्यकृत्योर्निपुणोऽसि कृष्ण ॥८५

समर्पयेऽहं भवतेऽतिभक्त्या पयांस्यपूपानपि मोदकांश्च ।
गृहाण तानाश्रितवत्सल त्वं श्रीवेङ्कटाधीश मदीश कृष्ण ॥ ८६

अल्पोऽयमित्यल्पदयायुतस्सन् मा भूरुपेक्षापरबुद्धिरत्र ।
किं ते कृपायाः करुणापयोधे न्यूनत्वमाधिक्यमथास्ति कृष्ण ॥ ८७

घ्नताऽपकर्तॄन्सुजनस्य दुष्टांस्त्वदाश्रिता एव न रक्षितास्त्वया ।
अवापिताः पुण्यगतिं हतास्ते क्रुद्धोऽपि कारुण्यकृदेव कृष्ण ॥ ८८

आत्मन्यनीशः करणैरशेषैः डोलायितस्संक्षुभितो भवामि ।
आकर्णयेमं प्रणतार्तनादं स्वास्थ्यं प्रतिग्राहय मां च कृष्ण ॥ ८९

नेत्रस्य पक्ष्मेव तवानपायी भृत्यो भवाम्याश्रव एव तेऽहम् ।
तवाविनाभावत एव शक्नोम्यपोहितुं पापतर्तिं च कृष्ण ॥ ९०

परेतराजोऽपि बिभेमि नाहं पद्मायताक्ष! प्रथितार्तरक्ष ।
तवाभिधानं नियतं स्मरामि विपद्विघातं शुभदं च कृष्ण ॥ ९१

नमोऽस्तु विश्वम्भर ते मदीयं नमोऽस्तु कञ्जायतनेत्र नित्यम् ।
नमोऽस्तु कारुण्यनिधे सदा ते नमो नमस्ते प्रियभक्त कृष्ण ॥ ९२

* नारायण लक्ष्मीश्वर नारायण वासुदेव नन्दकुमार ।
नारायण पर्वतधर नारायण पाहि मां सकरुणं कृष्ण ॥ ९३

श्वेता मृदेवापनुदत्यघानि श्रेयांसि सर्वाणि नृणां प्रदत्ते ।
ये तां ललाटे भुवि धारयेयुः पूताश्च रम्याश्च भवन्ति कृष्ण ॥ ९४

* दुर्वारचक्रपाणे शर्वाणीविनुतनाम जगदाधार ।
निर्वाणनाथ माधव सर्वात्मक पश्य मां सकरुणं कृष्ण ॥ ९५

लक्ष्मीश नारायण देवदेव मुहुर्मुहुस्त्वां मनसा स्मरामि ।
मां पालयावेशितभृत्यबुद्धिः त्वामेव यातं शरणं हि कृष्ण ॥ ९६

रमापते माधव शक्रमुख्यसुरस्तुतानन्तगुणाभिराम ।
त्वत्पादपद्मं करणत्रयेण प्रपन्नमुत्तारय मां च कृष्ण ॥ ९७

कराब्जयोः शंखसुदर्शने त्वं मौलौ किरीटं नवरत्नशोभि ।
वक्षःस्थलेऽनर्घमणिं च बिभ्रत्कान्तश्च भीमश्च विभासि कृष्ण ॥ ९८

*कन्दर्पकोटिसुन्दर मन्दरधर भव्यरूप मधुदैत्यहर ।
सुन्दरविग्रह मुनिगणवन्दित सततं स्मराम्यहं त्वां कृष्ण ॥ ९९

*नूपुरशोभितपाद प्रोद्धृतगोवर्धनाचल लसन्मूर्ते ।
मन्दरधर मुनिसन्नुत वसुदेवतनय भवान्मम गतिः कृष्ण ॥ १००

संबोध्य कृष्णं शतकं कृतं यः पठेत्स्वयं वा शृणुयात्परस्मात् ।
अवाप्नुयादैहिकभोगजातं निःश्रेयसं चापि स धन्यजीवः ॥ १०१

जातो भरद्वाजमहर्षिवंशे श्रीवेङ्कमांबातनयो नृसिंहः ।
दासस्त्वैतच्छतकं दयार्थी प्राणैषमज्ञोऽपि सभक्ति कृष्ण ॥ १०२

इत्यान्ध्या मधुरवचोभिरात्तकीर्तेर्
गैर्वाण्यां सकलजगत्प्रसिद्धवाण्याम् ।
तत्प्रेम्णा वरदसुधीकृतानुवादं
कृष्णस्तुत् शतकमिदं समाप्तमस्ति ॥

---

# श्रीनरसिंहशतकम्

*सी. श्रीमनोहर सुरार्चित सिन्धुगम्भीर भक्तवत्सल कोटिभानुतेज ।
कञ्जनेत्र हिरण्यकश्यपान्तक शूर साधुरक्षण शङ्खचक्रहस्त ।
प्रह्लादवरद पापध्वंस सर्वेश क्षीरसागरशायि कृष्णवर्ण ।
पक्षिवाहन नीलभ्रमरकुन्तलजाल पल्लवारुणपादपद्मयुगल ।
ते. चारुश्रीचन्दनागरुचर्चिताङ्ग कुन्दकुड्मलदन्त वैकुण्ठधाम ।
भूषणविकास श्रीधर्मपुरनिवास दुष्टसंहार नरसिंह दुरितदूर ॥ १

सीसश्लोकान् रचयितुमहं त्वत्परान् सम्प्रवृत्तः
छन्दश्शास्त्रं न खलु विदितं नापठं काव्यमेकम् ।
कोशज्ञानं किमपि न भवत्यल्पशो नापि शास्त्रम्
कारुण्यं ते यदि विरचये त्वत्स्तुतिं नात्मशक्त्या ॥
काव्यप्रणयने दोषाद्भक्तेः किं न्यूनता भवेत् ।
न हीक्षोर्वक्रता लोके माधुर्यमपकर्षति ।
धर्मपुर्या अधिष्ठातर् नृसिंह दुरितापह ॥ २

त्वन्नाममन्त्रेण नृसिंह शक्यान्यशेषपापानि भृशं निहन्तुम् ।
त्वन्नाममन्त्रेण नृसिंह शक्यं सर्वामयानां शमनं समूलम् ॥

---

*एतच्चिह्नाङ्कितानि पद्यानि संस्कृतमयत्वात् यथामूलं विनिवेशितानि । तेटगीतसहितस्य एकैकस्य सीसपद्यस्य तिस्र उपजातयो विरचिताः ।

# श्रीनरसिंहशतकम्

त्वन्नाममन्त्रेण नृसिंह शक्यं दुर्दान्तशत्रुक्षपणं विधातुम् ।
त्वन्नाममन्त्रेण नृसिंह शक्यं निष्कासनं दण्डभृतो भटानाम् ॥
त्वन्नाममन्त्रेण नृसिंह शक्या त्वदीयवैकुण्ठपदप्रपत्तिः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३

त्वामादिनारायणनामतो ये ध्यातुं विजानन्ति तदीयपादान् ।
साष्टाङ्गमेव प्रणिपातपूर्वं प्रणम्य तेषां सुगुणान् स्तवीमि ॥
परात्परं ये न विदुर्भवन्तं नाहं प्रसिद्धानपि तान् स्मरामि ।
ये श्रेष्ठमात्मानमिहामनन्ति सान्निध्यमेषां न हि रोचते मे ॥
ये सात्त्विका भक्तवरास्त्वदीया दासानुदासोऽस्मि विभो तदीयः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४

न भूतये त्वानुसरामि लुब्धो न चोपरुन्धे वसुने भवन्तम् ।
स्वर्णं प्रदत्स्वेति न चापि बाधे नान्दोलिकां वाप्युपयाच्यसे त्वम् ॥
नाराधये त्वां खलु भूषणार्थं क्षेत्राणि देहीत्यपि नार्थये त्वाम् ।
न सैन्यविश्राणनमर्थितस्त्वं न चार्दितः पुत्रपशूनपि त्वम् ॥
मदीप्सितं वस्त्विदमेकमेव मोक्षोपलब्धिर्भवतो ममालम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५

निन्दन्तु मां मन्द इतीह विज्ञा हसन्तु वा दीन इति प्रगल्भाः ।
वदन्त्वनार्याणि वचांसि वीरा भवन्तु दोषैकदृशोऽपरक्ताः ॥
कुर्वन्तु वाक्यैः परुषैः प्रहासं निन्दन्तु मां तीव्ररुषातिदृप्ताः ।
ब्रुवन्त्वसत्यान्यमितोक्तिभिर्वा सान्निध्यभाजोऽपवदन्तु नित्यम् ॥

कल्पद्रुमेणेव कृतावलम्बे मयि त्वयान्यैः किमु पद्मनाभ ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६

त्वां प्रीतये शुद्धहृदा भजामि न स्तोत्रपाठान् कुजनाद्ग्रहीतुम् ।
त्वां जन्मधन्यत्वकृते स्मरामि न तूत्तमश्लोकयुजे समेषु ॥
ध्यायामि मुक्त्यै प्रणिपातपूर्वं न त्वैहिकस्याभ्युदयस्य हेतोः ।
स्तोतुं भवन्तं कृतविद्य आसं न त्वात्मकुक्षेः परिपूरणाय ॥
प्रावर्तयन्मां परमार्थलिप्सा न कीर्तिसम्पादनकामनात्र ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७

यमात्मकर्णोपगताः कथास्ते पुण्याः प्रमोदं गमयन्ति नैव ।
त्वदेकचित्तान् प्रविलोक्य धन्यान् यो हर्षलेशं न खलु प्रपन्नः ॥
भक्तांस्त्वदाराधनतत्परान् यो द्वेषान्न खल्वाद्रियतेऽपि दृष्ट्या ।
पादाम्बुजध्यानमिह त्वदीयं यो वर्जयित्वा गमयेत्स्वकालम् ॥
स केवलो व्यर्थतमो हि लोके स सर्वथा सीदति दुर्गतो हि ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८

किं गौतमीस्नानविधेः कृती स्याम् सुदुस्सहं मे सलिलस्य शैत्यम् ।
किं तीर्थयात्राभिरुपैमि पुण्यं न पालनं मे नियमस्य शक्यम् ॥
किं दानधर्मैः सुगतिं प्रपद्ये धनं तदर्थं न हि मेऽस्ति किञ्चित् ।
किं सार्थकः स्यां चरितैस्तपोभिर्मुहूर्तमात्रं न मनः स्थिरं मे ॥
क्लेशान्विसोढुं न हि पारयामि शक्त्या भवन्तं मनसा स्मरामि ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९

अद्याद्विषं प्राणहरं मनुष्यो न पीडयेदर्थिजनं दरिद्रम् ।
पतेच्च कूपे गलबद्धभारो योषिद्धनं नापहरेद्विवेकी ॥
दावानलाभीलशिखाप्रवेशो वरं परस्त्रीप्रसभप्रसङ्गात् ।
मनाक् प्रियं याचनमेव भुक्त्यै न चौर्यकर्माचरणं कदापि ॥
वरं मृतिस्तुङ्गगिरेर्निपातात् भक्तैः समं ते कलहं न कुर्यात् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १०

*कस्तूरिकातिलकभूषितगर्दभोऽयं शाखामृगो मलयजप्रविलिप्तगात्रः ।
व्याघ्रो ह्ययं मधुरशार्करभक्ष्यभोजी सुस्वादुचूतफलभक्षकसूकरश्च ॥
मार्जालकः सुरभिकुन्दसुपुष्पमालः सौवर्णकुण्डलविभूषणवान् दिवान्धः
ज्योत्स्नाप्रभाधवलवस्त्रधरो लुलायः काको ह्ययं कनकपञ्जरवेशितश्च ॥
विद्रोहचिन्तनपरः सततं भवन् यस्त्वन्नाममन्त्रजपनं विदधाति दुष्टः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ११

गोपस्य दोषो यदि गौरवश्यः प्रजा असत्यो यदि राजदोषः ।
पत्युस्स दोषो यदि दारदौष्ट्यं पितुस्स दोषो यदि पुत्रशाठ्यम् ॥
नेतुस्स दोषो यदि सैन्यभङ्गो मातुस्स दोषो दुहिताऽसती यत् ।
आरोढृदोषो यदि वाजिदर्पो दुष्टे गजे हस्तिपकस्य दोषः ॥
एवंविधान् ये न विदन्ति दोषान् लोके यथेष्टं विचरन्ति तेऽद्य ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १२

सौवर्णवस्त्रावरणात्कपेः किं वैधव्यभाजः किमु कुन्दपुष्पैः ।
निर्नासिकाया वरमुक्तया किमन्धस्य जात्या मुकुरेण किं वा ॥

* मकुटं विना वसन्ततिलकावृत्तमिदम् ।

पोटास्त्रियः किं मणिहारतल्पा किं क्रूरचित्तस्य वरिष्ठगोष्ठ्या ।
किं स्वैरिणीनां प्रकटप्रवृत्त्या दुष्टप्रवृत्तेः किमु मातृतादेः ॥
यथेष्टवृत्तेः किमु सत्यवाचा श्रुतेः कथानां बधिरस्य किं वा ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १३

क्षेत्रप्रदाने न हि कोऽपि शक्तः क्षेत्रप्रणाशे सकलः समर्थः ।
दुर्भिक्षपीडां न हि कोऽपि पश्येत् समीक्षितारस्तु समे सुभिक्षे ॥
दारिद्र्यभाजं कथयन्ति नैव वदन्ति ऋद्धानधिकृत्य भूरि ।
स्वदारदोषं न हि कोऽपि विद्यात् सर्वः परस्त्रीप्रविगानवाग्मी ॥
एवंविधा यैरधिकारभाजस्त एव निन्द्याः प्रभवोऽत्र नान्ये ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १४

स्वमातृगर्भाद्धनमाहरेत्को नयेच्च तत् स्वेन समं मृतौ कः ।
क्षारान्नमेवात्ति जनः सलक्षो न काञ्चनं वा न मणीन् स भुङ्क्ते ॥
वित्तार्जनाद्गर्वमदौ भवेतां नात्मानमन्वेष्यति सञ्चितं स्वम् ।
अदानसंवर्धितवित्तमन्तर्निधाय भूमौ परिरक्ष्यते यत् ॥
तच्चोरसात् स्याद्धरणीशसाद्वा मध्वन्यगं स्यात् मधुमक्षिकात्तम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १५

लोकेऽत्र लुब्धो धनसञ्चयार्थी ददाति भिक्षां न हि याचकाय ।
न कापि हानिः स्वयमप्रदाने न दानमन्यैरपि तस्य सह्यम् ॥
स्वस्यैव वित्तस्य विनाशरक्षी कर्णेजपो दातुरजस्रमेषः ।
नन्दत्ययं याचनमोघतायां शोचत्यसावर्थिजनस्य सिद्धिम् ॥

एवंविधः क्रूरजनोऽत्र सर्वैराहूयतां याचकशत्रुनाम्ना ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १६

प्रयाणकाले तनुतोऽप्यसूनां ध्यायेन्नरो यस्तव दिव्यमूर्तिम् ।
मुहूर्तमात्रे समुपैति स त्वां न क्लिश्यते हस्तगतो यमस्य ॥
आनन्दमग्नो भजते भवन्तं यस्तस्य पुण्यं किमिति ब्रवाम ।
त्वद्दास्यभाजां भवतीह मोक्षो दूरे त्वपास्ता नरकस्य वार्ता ॥
तुच्छा जनास्ते न विदुर्महिम्नो मुक्तिस्तु तेषामतिदुर्लभैव ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १७

त्वमेव नीलाभ्ररुचे पिता नः पद्मालया नो जननी च लक्ष्मीः ।
त्वदीयभक्ताः सुहृदो यथार्थास्तव प्रसादः सुमहद्धनं नः ॥
विज्ञानजातं तव कीर्तनानि नित्यं च सौख्यं भवदीयसाह्यम् ।
विद्यानवद्या तव नाममन्त्रो ध्यानं त्वदङ्घ्र्योश्च जपोऽस्ति नित्यः ॥
समर्पितस्ते तुलसीछदोऽपि सर्वामयानां विनिवारणश्च ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १८

आयुष्यकालं सकलं भजे त्वां यद्विस्मृतिं ते मरणे विशङ्के ।
यदा परेताधिपकिङ्करा मे प्राणान् शरीरादपहर्तुकामाः ॥
यदाभिभूतः कफवातपित्तैः उद्भूतकम्पो विवशश्च वर्ते ।
तदात्मनस्त्वां रसनेन किं नु नारायणेत्यादरतो ह्वयामि ॥
ध्यायामि ते नाम तदद्य भक्त्या कर्णौ दयालो वितराब्धिशायिन् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १९

न वेत्ति भूतात्मकपिण्डनाशो भवेत्कदेति प्रथितोऽपि विद्वान् ।
वदेयुरायुश्शतवर्षमानं श्रद्धेयमेतन्न हि लोकविद्भिः ॥
बाल्येऽथवा यौवनसङ्गतौ वा वृद्धत्वयोगे यदि वा जरायाम् ।
ग्रामे वने वा सलिलस्य मध्ये कदा म्रियेत क्षण एव कस्मिन् ॥
ध्रुवा मृतिस्त्वां तदवैतु धीमान् देहे स्थिते वर्त्तिव दीपसत्त्वे ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २०

माता पिता दारसुतास्तथाप्ताः श्यालाग्रजातानुजमातुलाश्च ।
इत्यादिबान्धव्यभृतस्समेऽपि न प्रेतमर्त्याननुयन्ति लोके ॥
प्राणापहर्तॄन् शमनस्य दूतान् प्रसह्य युद्ध्वापि न वारयेयुः ।
शोकप्रतप्ता अपि बन्धवोऽस्य न जीवितं द्राघयितुं समर्थाः ॥
तद्बान्धवेभ्यस्सुधियावतार्य त्वय्येव संरक्षकता निवेश्या ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २१

सम्बोधनेऽप्युच्चतरे कृते न प्रत्युक्तवांस्त्वं किमु मौनितैषा ।
प्रणामपूर्वं कृतयाचनो न दृग्गोचरस्त्वं किमु धाष्टर्यमेतत् ॥
अनन्यगत्या शरणं वृतोऽपि दत्से न भाग्यं किमिदं महत्त्वम् ।
अचञ्चले पादनिषेवणेऽपि नासाद्यसे कीदृगिदं हि शाठ्यम् ॥
किं बाधनेनेदृशबालिशस्य मुक्तिप्रदावेप्ससि तुष्टिलाभम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २२

त्वन्नामसङ्कीर्तनगीतिभिस्त्वां न नारदो रञ्जयितुं सदाहम् ।
त्वत्पादपङ्केरुहसेवया न शक्यहं तोषयितुं भवन्तम् ॥

आब्राल्यमाह्लादयितुं च भक्त्या प्रह्लादनामास्मि न भक्तवर्यः ।
स्तोतुं च काव्यग्रथनेन नाहं व्यासः कवीनां कविराद्यभूतः ॥
अज्ञश्च मूर्खश्च नराधमोऽहं हीनश्च मां पाहि जगत्पते त्वम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २३

अभ्यास्थमाख्यातुमसत्यवाचो नाचिन्तयं भाषितुमेकसत्यम् ।
सत्कार्यविघ्नाचरणं व्यतानि नाकारि किञ्चिज्जनतोपकारि ॥
पर्यग्रहीषं परकीयमर्थं न पर्यचैषं स्वधनप्रदानम् ।
दानं परेषां न मया व्यषेहे न दापने तैर्विदधे मयाऽल्पम् ॥
पङ्केरुहाक्षास्मि महापराधः क्षमस्व पापान्यखिलानि देव ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २४

यावन्नरो जीवति भूतलेऽस्मिन् संसारसङ्गाहत एव तावत् ।
अशेषपापाचरणप्रसक्तः त्वत्प्राप्त्युपायं न बुभुत्सतेऽयम् ॥
यदान्तकाले शमनस्य दूतैः स्वलोकमाकृष्य स ताड्यमानः ।
असह्यबाधो विलपन् बहूच्चैः त्रात्रे च दिक्षु प्रहितार्तचक्षुः ॥
धन्यस्तदा कः प्रविमोचयेत्त्वं मोक्षोऽभविष्यद्यदि भक्तिरादौ ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २५

विद्याधिका नैव जनार्हणार्हाः सभाग्रगण्यास्तु निरक्षरास्याः ।
यथार्थवाचो जनताविरुद्धाः आप्ता जना ये वितथं वदन्ति ॥
दारिद्र्यभाजः खलु दानशीला आढ्याः पुनर्लुब्धतमा भवन्ति ।
व्याध्यादिपीडाः कृतपुण्यकार्या दुष्टाः पुनर्वृद्धिमुपेयिवांसः ॥

त्वद्याचकानामतिदुर्बलत्वं त्वं केवलो नः शरणं शरण्य ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २६

व्याघ्रान्निहन्याद्भुजयुग्मशक्त्या भुजङ्गकण्ठग्रहणं च कुर्यात् ।
विद्रावयेद्भूतपिशाचकोटीः निवारयेच्चापि मनुष्यरोगान् ॥
गिलेत्समुद्वेगकरं च तिक्तं भिन्द्यात् कृपाणं निशितं करेण ।
क्लेशाद्विशेत् कण्टकसञ्चयं वा कुर्यान्नरो बद्धमुखं तुलायम् ॥
न ज्ञानबोधेन खलान् धरण्यां सौजन्ययुक्तान्निपुणो विदध्यात् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २७

क्षेत्राणि पुण्यान्यखिलानि गच्छेत् गाहेत मुख्यासु नदीषु यत्नात् ।
सन्ध्यामुपासीत गृहीतनासः आवर्तयेच्चापि जपाक्षमालाम् ॥
ब्रूयाच्छ्रुतीनां सविमर्शमर्थं यजेत सर्वैः क्रतुभिः प्रशस्तैः ।
दद्याद्धनस्यार्थिजनाय कोटीः आन्तं भवेन्नैष्ठिककर्मकोऽपि ॥
न केवले त्वच्चरणाब्जयुग्मे युञ्जीत चित्तं परतो निवर्त्य ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २८

त्वदीयवृत्तश्रवणं यदि स्यात् किं कर्णयोः कुण्डलधारणेन ।
त्वद्दर्शनव्यापृतता भवेच्चेत् किं हस्तयोः कङ्कणबन्धनेन ॥
स्याच्चेत् त्वदङ्घ्रिप्रणिपातशीलं किं जात्यरत्नाभरणेन मूर्ध्नः ।
त्वदीयनामस्मरणं भवेच्चेत् कण्ठस्य सन्मौक्तिकहारतः किम् ॥
पूजा त्वदीयैव समस्तभूषा न रोचतेऽलङ्करणान्तरं मे ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २९

न स्तौति यस्त्वां भुवनैकनाथं मुखं हि तच्छून्यगृहं प्रदुष्टम् ।
दिदृक्षुणी ये न भवन्तमीड्यं नेत्रे भवेतां लशुनोपमे ते ॥
न सेवते यो भजनीयमूर्तिं कायस्स पण्येतरचर्मभस्त्रिः ।
ये कौतुकात्ते शृणुतः कथा न श्रोत्रे हि रन्ध्रे कठिनाश्मसंस्थे ॥
न भक्तिमान् यस्त्वयि मानवः स्यात् स एष पादद्वयवाल्लुँलायः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३०

विद्योपलब्धिर्व्यसनाशनार्थं पश्वर्जनं क्षीरसमृद्धये च ।
दारक्रिया स्याद्विषयोपभुक्त्यै पुत्रोपलम्भश्च परत्र गत्यै ॥
सैन्योपक्लृप्तिः परराजभीत्यै नाशाय शस्त्राभ्यसनं हि सर्वम् ।
दानं भवेद्भाविधनस्य लब्ध्यै शिक्षा दृढा स्वोदरपूरणाय ॥
विहाय कामानितरानजस्रांस्त्वदेकभक्तिर्भवतीह मुक्त्यै ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३१

तिष्ठेच्छरीरं न सहस्रवर्षं न शाश्वतं वा द्रविणं धरण्याम् ।
न दारपुत्रा अनुयान्ति मर्त्यं भृत्या मृतिं वा न निवारयेयुः ॥
न जीवयेत्स्वं भुवि बन्धुजातं शौर्यं बलं नाप्युपकारि किञ्चित् ।
भोगैस्सहस्रैर्विभवैश्च पूर्णः नयेन्न कौपीनमितः परत्र ॥
आलर्कचेष्टाः प्रविहाय ये त्वां भजन्ति तेषां परमा सुखाप्तिः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३२

अगण्यदुर्नीतिरहं नृसिंह विमृश्यमाने न गुणो ममैकः ।
नाहं परस्त्रीविरताभिलाषः समृद्धिरन्यस्य सुदुस्सहा मे ॥

एवंविधामङ्गलबुद्धिरसि सर्वा मदीयाः कृतयोऽतिनीचाः ।
पापिष्ठमेतादृशमत्र पृथ्व्यां अजीजनस्त्वं कुत एव हेतोः ॥
यतो भवान् मे जनकस्ततो मां त्रायस्व सोढ्वा बहुलापराधान् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २३

अभ्यस्तवानस्म्यहमन्यनिन्दां स्तुतौ पुनस्ते न मया प्रवृत्तम् ।
मनोऽन्यकान्तासु मया निबद्धं ध्याते त्वदीये चरणाम्बुजे न ॥
कुतोऽन्यवृत्तश्रवणाभिलाषः न व्यापृतं त्वच्चरितावबोधे ।
सम्पादितं सस्पृहमेव पापं न त्वार्जितः पुण्यकणः कदाऽपि ॥
न ह्यत्र किञ्चिज्जननस्य लोके दृष्टं फलं मे भवितासि कीदृक् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ २४

कफादिरोधादवसानकाले ध्यायामि वा नेति तदद्य कुर्वे ।
नृसिंह लक्ष्मीश नृसिंहदेव दैत्यान्तकाहस्करकोटिकान्ते ॥
गोविन्द विश्वाधिप विश्वपोष भुजङ्गशायिन् मधुकैटभारे ।
प्रह्लादसन्त्राणपराब्जनाभ लोकेश पीताम्बर वेदवेद्य ॥
एवंविधैः सुप्रथिताभिधानैः ध्यायाम्यजस्रं मनसा भवन्तम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहातांहो नरसिंहदेव ॥ २५

धनायुरारोग्यसुतादि सर्वं भवान् प्रदत्ते सकलस्य कर्ता ।
विद्याप्रदानेन सभास्वनिन्द्यपदस्य हेतुश्च भवान् दयाब्धे ॥
कुर्वन्नवद्येतरवर्तनं त्वं लोकस्य सुश्लाघयशःप्रदाता ।
धीभक्तिवैराग्यधनं प्रकल्प्य मोक्षप्रदाताऽपि भवान् जनस्य ॥

आज्ञा जनेभ्यो विविधाः प्रदाय मोघप्रयत्नान् सफलीकरोषि ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३६

सश्रद्धरक्षाविषयीकृतोऽपि कायो न नित्यां स्थितिमेति लोके ।
रोगः कदा कश्च ससम्भवो नः न ज्ञायते नापि स वारणीयः ॥
निषेवितेऽप्यौषधसञ्चये नः कर्मक्षयादेव गदस्य शान्तिः ।
परश्शता वैद्यवरा मिलित्वा न मारकव्याधिहतौ समर्थाः ॥
उत्क्रान्तिकाले समुपस्थिते नः आत्मा न काये क्षणमत्र तिष्ठेत् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३७

सयज्ञसूत्रः कृतसान्ध्यकर्माप्यब्राह्मणो ब्रह्मधिया विहीनः ।
श्रीचूर्णमृद्भ्यां विहितोर्ध्वपुण्ड्रोऽप्यवैष्णवः स्याद्यदि विष्ण्वसेवी ॥
न भस्मना दिग्धललाटपट्टः पिनाकिपूजामविधाय शैवः ।
कषायवर्णे वसने वसानोऽप्यवीतकामो न भवेद्यतीन्द्रः ॥
धृत्वापि वेषानिह लौकिकान्यो गुरुं न सेवेत न मुक्तिमान् सः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३८

नृसिंहदेव त्वयि बद्धभावे मय्यादरं दर्शय तावकीने ।
श्रान्तो भवद्याचनयाहमासं अवाप्तकामं कुरु साम्प्रतं माम् ॥
हर्षेण मां प्रेषय देवलोकं इहैव वा स्थापय मर्त्यलोके ।
वैकुण्ठमारोपय वातितोषात् निपातयेर्वा निरयेऽतिकोपात् ॥
संस्थापिताय क्वचनापि मह्यं अविस्मृतिं तेऽनुगृहाण नित्याम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ३९

आदेहपातात् प्रविमोहसिन्धौ जनो निमज्जत्यतिमूढबुद्धिः ।
नित्यानशेषान् विभवान् विचिन्त्य षट्कं प्रमाणां न जहाति कोऽपि ॥
बद्धस्सदा संसृतिबन्धनैश्च गुरोः प्रसादं न समीहतेऽयम् ।
धीभक्तिवैराग्यवतोऽवलोक्य निन्दां विना स्थातुमशक्त एषः ॥
असत्कुला दुष्टधियश्च सर्वे न पारयन्ति प्रविलोकितुं त्वाम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४०

यदा मयासादितमत्र जन्म ततः परं पापततिर्मयाप्ता ।
बुद्ध्वाप्यबुद्ध्वापि कृतैश्च पापैः सम्पीडितोऽहं भृशमब्जनाभ ॥
महान् प्रयासोऽस्त्यनुभूतिकालेष्वित्युच्यमाने सुमहद्भयं मे ।
बाधानिवृत्त्यै प्रपलायनं तु यत्र क्वचिन्मे न हि शक्यमस्ति ॥
अतो भवन्तं शरणं प्रपद्ये विच्छिद्य बाधानव मां नृसिंह ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४१

अकार्यकृत्त्वं दुरितालवाल इति ब्रुवन् मा भव दोषदर्शी ।
अद्यैव मां दण्डय दण्डनीयं आन्तं त्वया नात्र विलम्बनीयम् ॥
क्रूराः श्रुता दण्डधरस्य दूताः तद्धस्तगं मा कुरु मां प्रपन्नम् ।
दासेषु दण्डे विहिते त्वयैव मा मेति को वा विनिवारयेत्त्वाम् ॥
दासान् यदा दण्डयसीतरैस्त्वं स्यादप्रतिष्ठा तव मानिषाद ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४२

आजन्मनो मे जननीसकाशात् न पुण्यकार्यं रचितं मयैकम् ।
नैकादशीसुव्रतमप्यधारि न तीर्थयात्राभिगमोऽप्यकारि ॥

नाकार्षमेकं परमार्थकृत्यं विश्राणिता नार्थिजनाय भिक्षा ।
नानंसिषं ज्ञानवतः कदापि न दानमेकं व्यदधां परस्मै ॥
त्वय्येव विश्वासमुपेयिवांसं त्रायस्व मां त्वं शरणं प्रपन्नम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४३

कः पक्षिजात्यै प्रददे तदन्नं तृणादिकं को व्यतरन्मृगेभ्यः ।
कोऽभोजयद्वा वनचारिबृन्दं कोऽपाययद्दून् जलमुद्धृतं च ॥
को मातृगर्भस्थशिशून् पुपोष पयः फणिभ्यो विततार कश्च ।
कोऽसञ्जयद्भृङ्गततेर्मरन्दं कोऽचीक्लृपद्वालतृणं पशुभ्यः ॥
त्वमेव पुष्णासि हि जीवलोकं त्वदन्यदाता न हि दृश्यतेऽत्र ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४४

ब्रह्मादिसंसेव्य भवन्ति दासाः परस्सहस्रा न दरिद्रता ते ।
विक्षिप्तचित्तं बहुकार्यभारात् मा विस्मरेमं विभवातिरेकात् ॥
नैकेषु ते भृत्यवरेषु सत्सु नीचादितस्ते क इवोपकारः ।
त्वत्प्रीतिदं कर्तुमनीश्वरोऽहमासं समासादितमोघजन्मा ॥
नरेषु सर्वेष्वधमोऽहमेव निपातयास्मिन् करुणार्द्रदृष्टिम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४५

यतो भवान्मे जनकः पितातो न विप्रयोगो न च विस्मृतिस्ते ।
न प्रार्थयेऽन्यान् भरणं मदीयं जानीहि तत्त्वं भवदेकनिष्ठम् ॥
प्रकल्प्यते चेदसमर्थतात्र सर्वाग्रतः स्यात्कलहस्त्वया मे ।
धनं न चेत्ते स्वधृतं किरीटं विक्रीयतां कङ्कणकुण्डलादि ॥

स्वशङ्खचक्रे प्रतिभूत्वकारी मामन्ततोऽच्छद्म पुषाण नाथ ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४६

त्वां सेवमानाय चिराय नाथ किं वेतनं मे न ददासि देयम् ।
न सामवाक्यान्युपकुर्वतेऽत्र निस्संशयं स्यात्कलहस्त्वया मे ॥
त्वं साधुरेवेत्यभिमन्यमानः प्रायापयं कालमिमं सुदीर्घम् ।
सुदुस्सहस्तेऽतिविलम्ब एष सज्जोऽस्म्यहं दण्डय मां यथेष्टम् ॥
न चेद्भवान् मामनुकम्पतेऽद्य विशृङ्खलस्सन् कलहं करिष्ये ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४७

पर्यङ्कभूतो भवतस्स शेषो निर्व्यूढवृत्तिः पवनेन दृष्टः ।
खगाधिराजस्तव वश्ययानं भुजङ्गभोजी स्वतनूं बिभर्ति ॥
पद्मालया गच्छति ते कलत्रं सदार्हणायै गृहिणां गृहाणि ।
दिने दिने भक्तवराश्च तुभ्यं पक्वान्नजातं ददते सभक्ति ॥
एवं चलन्त्यां निजदेहवृत्तौ काचस्य नैकस्य भवेद्व्ययस्ते ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४८

कदा भवद्दर्शनभाग्यमीयामुपोषिताभ्यामिव लोचनाभ्याम् ।
रूपं निजं दर्शय दर्शनीयं चेतो यथा स्यान्मम सप्रमोदम् ॥
न पापकृद्दर्शनगोचरः स्यामिति प्रतिज्ञां कठिनामकार्षीः ।
दीनावनः स्यादयमेक एवेत्यश्रौषमास्यान्महतां प्रति त्वाम् ॥
अहो कथं ते ववृधे यशोऽत्र द्रोही कथं त्वां समुपैम्यनिन्द्यम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ४९

शरीरमामा खलु चर्मभस्त्रि: असारमेतस्य जुगुप्स्यमन्तः ।
रक्तञ्च मांसञ्च सिरास्थिजातं पुरीषकोशो नवसङ्ख्यरन्ध्रम् ॥
वर्षातपौ तत्सहते न तीव्रौ न क्षुत्पिपासे क्षमतेऽल्पतोऽपि ।
सर्वामयानां निलयो हि देहः स्थिरेतरत्वाज्जलबुद्बुदाभः ॥
प्राणेषु यातेषु शरीरमेतत् श्मशानयोग्यं न किमप्यनेन ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५०

त्वत्पादतीर्थादपयान्ति रोगा अलं सुवैद्यैरलमौषधैर्मे ।
सख्यं वहंस्त्वां सततं निषेवे संस्थापयेमं तव दासकोटौ ॥
स्मरामि चक्रं ग्रहवारणाय न घोररक्षाभजनं समीहे ।
भजे त्वदङ्घ्री उरगक्षतोऽहं मन्त्रौषधी नैव विचिन्तयामि ॥
उपस्थितो वैद्यवरो मम त्वं बिभेमि न क्लेशपरम्परायाः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५१

पिण्डार्थमत्यल्पजनैः क्षुधार्तो निन्दासहस्रास्पदतां प्रणिन्ये ।
दारात्मजातेष्वनुरागयोगात् भ्रमामि देशेष्वखिलेष्ववश्यः ॥
दारिद्र्यरक्षोग्रहणान्निमित्तात् कार्या मयासीत्कुजनस्य सेवा ।
मदीयचेतस्यभिमानयोगात् भयानुभूतिः परतः प्रसक्ता ॥
संसारवार्धिं तरितुं न शक्तः सहस्रधा प्रार्थनमेव कुर्वे ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५२

सद्भिः समं स्यात्कलहादनर्थः विरोधिभावेन कविष्वनर्थः ।
दीनाभिघातेन भवेदनर्थः स्यादर्थिनां दुःखजनेरनर्थः ॥

भक्तापचाराचरणादनर्थः गुरोश्च वित्तापहृतेरनर्थः ।
दारिद्र्यभाक्कुत्सनतो ह्यनर्थः विगर्हणात्पुण्यवतामनर्थः ॥
ये निन्द्यकार्याणि चरन्ति दुष्टाः सञ्चीयते तैर्निरयो हि वित्तम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५३

परस्य लुभ्येद्द्रविणादिने यः काङ्क्षेच्च यो वा परकीयकान्ताः ।
यश्चार्थिवित्तापहृतिं विदध्यात् यो वारयेदन्यजनस्य दानम् ॥
कर्णेजपः स्यात्समितिस्थितो यो यः पक्षपातेन वदेच्च साक्ष्यम् ।
यो विष्णुदासान् प्रहसेद्विलोक्य यो धर्मनिष्ठान् समुपालभेत ॥
प्रजाः पशून् योऽकरुणं विहिंस्यात् स हिंस्यते कालभटैर्गदाभिः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५४

मां पाहि मां पाहि नृसिंह तात मां रक्ष संरक्ष वितीर्णकामः ।
प्रसीद मय्यार्तिहर प्रसीद गतिर्भवान्मे सुगतिस्त्वमेव ॥
त्वं पालयेमं परिपालयेमं त्रायस्व मां त्राणपरो भवास्य ।
कृतागसं मर्षय मर्षयेमं हस्तं गृहाणास्य गृहाण हस्तम् ॥
सुरस्तुत त्वां शरणं गतोऽहं निशम्य याच्ञां कुरु मां कृतार्थम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५५

विस्फारिताक्षः प्रविलोक्य दासान् बद्धाञ्जलिर्यः प्रणमेत्त्वदीयान् ।
त्वद्भक्तवर्यैः कथिताः कथा यः शृणोत्यतृप्यन् विनयेन नम्रः ॥
तवागतान् यो निजसद्म दासान् अग्र्यासनेऽर्चत्युपवेशनेन ।
जातिं कुलं वाप्यविमृश्य यस्ते भक्तानुपैति प्रणिपातपूर्वम् ॥

धन्यो ह्ययं भागवतोत्तमश्च तद्दर्शनं स्यात्सुकृतस्य हेतुः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५६

किं पञ्जरान्तर्निहितोऽपि काकः कीरो यथा संलपितुं समर्थः ।
किं रासभः प्रग्रहदानमात्रात् प्रेक्ष्यप्लुतो वाह इव प्रयाति ॥
आधोरणेनाहितशिक्षणः किं दन्तीव गन्तुं प्रभवेल्लुलायः ।
गृद्ध्रोऽपि सम्यक्परिपोषितः किं क्षमः खगान् श्येन इव ग्रहीतुम् ॥
संसेवितुं त्वां कुजना नियुक्तास्त्वद्भक्तवर्या इव किं भजेयुः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५७

पृथ्वीसुरः शिक्षितवेदशास्त्रो यागक्रियायापितसर्वकालः ।
प्राभातिकस्नानपरश्च कर्मी निर्विघ्ननिर्वर्तितनित्यकर्मा ॥
दान्तो गृहीतानशनव्रतश्च तुर्याश्रमी तद्धृतलिङ्गधारी ।
अशेषदानाचरणप्रसक्तः पुण्यापगाक्षेत्रचयोपगन्ता ॥
त्वत्सक्तचित्ता यदि न स्युरेते बाह्या भवेयुस्तव दिव्यधाम्नः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५८

कारुण्यवार्धे मम यावदायुः स्नेहादसद्भिस्सह दुष्टतासीत् ।
मामाद्रियस्वाशनवस्त्रदानैः सर्वेश मे त्वं जनकः पितासि ॥
मदन्तकाले मयि पक्षपातात् सम्प्रेष्यतां मां प्रति ते भटालिः ।
आकृष्य मां नेतुमुपागतेभ्यस्त्रातुं सुदीनं यमकिङ्करेभ्यः ॥
मामन्ततः प्रापय सन्निधिं ते त्वदाश्रवं मां सततं विधेहि ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ५९

तवैव विश्वासयुतोऽस्मि दासस्तत्पातयास्मिन् सदयं कटाक्षम् ।
बद्धाञ्जलिर्द्रोहितया न गण्यो नाहं परस्ते प्रणतार्तिहारिन् ॥
भजामि भक्त्या तव पादपद्मे न प्रार्थयेऽन्यान् कुरु मे प्रसादम् ।
श्रेष्ठोऽसि दातृष्वविलम्बितो मां त्रायस्व विध्वस्तमदीयपापः ॥
मनोरथान् पूरय भिन्धि चिन्तां पुषाण मां त्वं सततं दयस्व ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६०

अशिक्षि विद्येति न गर्वितोऽहं नाघोषयं स्वं धनधान्यपूर्णम् ।
न द्रव्यवानित्यभवं ननम्रो नात्मानमाचक्षि च दानशौण्डम् ॥
पुत्री किलास्मीति मया न हृष्टं नामादयन्मां खलु भृत्यसम्पत् ।
न शौर्यलक्ष्म्याप्यभवं प्रमत्तो नात्मा मयामन्यत कार्यशूरः ॥
गतं न मार्गे जनसम्मते वा त्वय्येव विश्वासमुपैमि नाथ ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६१

अभ्यर्थनं लुब्धजनस्य नीचं न्यासः परत्रात्मधनस्य नीचः ।
संसेवनं चावगुणस्य नीचं नीचो निवासः परकीयगेहे ॥
स्पर्धोपलम्भो धनिना च नीचो विरक्तबन्धूपगमोऽपि नीचः ।
निस्स्वस्य नीचोऽप्यधमर्णभावो नीचः प्रसङ्गः सह जारचौरैः ॥
संवृत्त एवास्मि तवाद्य दासो विना त्वया मे जननं हि नीचम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६२

वेदाक्षरैर्दासजनस्य किं स्यात् अज्ञस्य किं वा मधुरैः प्रगीतैः ।
किं तत्त्वबोधः पशुपालकस्य विटस्य विष्णोः चरितैः श्रुतैः किम् ॥

किं ग्रन्थरत्नैः बहुगर्ह्यवाचः किं श्रान्तिशीलस्य च विष्णुभक्त्या ।
लुब्धस्य किं दातृतया गुणेन सत्सङ्गतो दुष्टभटस्य किं वा ॥
क्रूरात्मनां त्वय्यभिकाङ्क्षया किं पापात्मनां किं करुणार्द्रवृत्त्या ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६३

दाता पिता त्वं हि मदिष्टदैवं आगस्कृतं मर्षय मां नृसिंह ।
सोढापराधश्च मयि प्रसीद गतिर्भवान्मे निगमान्तवेद्य ॥
दौरात्म्यहेतोर्मम नातिरुष्टो भवेद्भवानित्यहमर्थये त्वाम् ।
अभ्यर्थनाभिर्मम मुक्तिदातः त्रायस्व कारुण्ययुतो दयालो ॥
महाप्रभुं त्वामनुयामि शश्वत् प्रकाशितात्मा परिपालयेमम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६४

भवत्कथा यश्शतशः शृणोति पराङ्मुखोऽयं परवृत्तवित्तेः ।
यस्यात्त्वदीयस्तुतिपूर्णजिह्वः निर्यान्ति नास्यात्खलु दुष्टवाचः ॥
भक्त्यानुगच्छेत्सततं च यस्त्वाम् न सोऽनुधावेद्धनमत्तचित्तान् ।
स्मरेच्च यस्त्वां सततं प्रमोदात् न चिन्तयेदप्यसतां स नाम ॥
ध्रुवं भवन्तं शरणं प्रपन्नः देवान्तरं नोत्सहते प्रपत्तुम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६५

अप्यर्थितस्त्वं दयसे न कस्मात् सम्बोधितो न प्रतिवक्षि किं त्वम् ।
प्रत्युक्तितः किं च्यवसे पदात्त्वम् किं नास्यचन्द्रः तव दर्श्यते मे ॥
संस्कारमर्हेच्छरणं प्रपन्नः न सांप्रतं तं परिहर्तुमेव ।
अचिन्त्यमानान्भवतैव दासान् कोऽन्यः समीक्षेत दयाम्बुराशे ॥

त्वमेव दाता जननी पिता च त्वत्पादपद्मे प्रणतः प्रपद्ये ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६६

वेदेष्वधीती धरणीसुरोऽपि रणे विजेता धरणीश्वरोऽपि ।
वाणिज्यकृष्यादिकरोऽपि वैश्यो लोकस्य सेवाप्रसितोऽपि शूद्रः ॥
म्लेच्छोऽपि हस्तस्थविभासुरासिः प्रजोपकारी रजकोऽप्यनिन्द्यः ।
चण्डालजातिः पशुचर्मपण्यः यः कोऽपि वा स्याद्धरणीतलस्थः ॥
योऽनन्तकल्याणगुणं स्तुते त्वाम् स एव मोक्षाधिकृतोऽत्र लोके ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६७

उपात्तविद्यो विजयेत गोष्ठ्याम् युध्येत संख्ये प्रसभोद्धृतारिः ।
पायाच्च राज्यं नृपवंशजातः दद्याद्धिरण्यं च पयस्विनीश्च ॥
नभस्स्थिता वा गणयेच्च ताराः वदेच्च नामान्यपि चेतनानाम् ।
अष्टाङ्गयोगाभ्यसनं च कुर्यात् पर्णाशनः स्यादजवन्मनुष्यः ॥
न शक्नुयुर्ब्रह्मपिनाकिशक्राः त्वद्वर्णनं कर्तुमवर्णनीय ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६८

भवादृशे स्वामिनि नाथ लब्धे भजामि नाहं कुजनान् कदापि ।
न दित्ससे यद्यपि सम्पदं मे कुतो न पूर्येत मितापि कुक्षिः ॥
न दुष्करस्ते क्षुधितस्य पोषः नानल्पकार्यं यदि ते चिकीर्षा ।
अशक्नुवन्याचयसे मया किम् कुतस्त्वयाहं विहितो दरिद्रः ॥
संदर्शनात् श्राम्यत एवमस्य किं नेत्रनिर्वाणमभीप्ससि त्वम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ६९

त्वत्सन्निधिं प्रापमहं वदंस्त्वाम् मां पाहि पाहीति विमुक्तकण्ठम् ।
मह्यं प्रतिज्ञातवरानदत्त्वा न शक्यतेऽप्युच्चलितुं तवेतः ॥
निषाद्य चेलं सुदृढं गृहीत्वा निष्क्रष्टुमीहे भवतो मदीयम् ।
ये केऽपि तेऽस्मिन्कलहे सहायाः तेषां जनानामहमप्रधृष्यः ॥
प्रचण्डकोपोऽस्मि तदद्य जानन् रिरक्षिषुः स्वं परिपालयेमम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७०

प्रह्लाददत्ता उपदाः कियत्यः मुक्तास्त्वयाप्ताः करिणः कियत्यः ।
भूषाश्च का नारदतस्त्वासन् कमग्रहारं प्रददेऽप्यहल्या ॥
चिक्रोडतस्ते कियती सपर्या विभीषणात्कस्तव लाभ आसीत् ।
किं पाण्डवास्ते रचितोपकाराः किं द्रौपदी ते द्रविणं व्यतारीत् ॥
एतादृशोऽहं न भवामि किं ते न त्रायसे तानिव मां किमर्थम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७१

बलिं समेतः क्षितिपं सकामः कथं भवान्याचितवान्गतह्रीः ।
वने फलादीन् शबरीवितीर्णान् कथं ग्रहीतुं घटितांजलिस्त्वम् ॥
द्रुतं गतस्त्वं विदुरस्य वेश्म मिष्टान्नभोजी कथमत्रजातः ।
कथं कुचेलात्पृथुकस्य मुष्टिं आदाय वेगाद् ग्रसितुं प्रवृत्तः ॥
स्थाने भवान् भक्तजनाय दद्यात् कुक्षिंभरिर्नार्हसि संग्रहीतुम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७२

स्तम्भात्समुद्भूय निहत्य रक्षः प्रह्लादमावीर्निजभक्तमार्तम् ।
नक्रोपरुद्धं द्विरदं विषण्णं सन्त्रातवांस्त्वं लघु सानुकम्पः ॥

विभीषणे त्वां शरणं प्रपन्ने लङ्काधिपत्यं ददिषे त्वमस्मै ।
समर्पयन्तं पृथुकस्य मुष्टिं अन्वग्रहीर्वैभवतः कुचेलम् ॥
कुतो न मां तानिव पुष्यसि त्वं न साम्प्रतं ते खलु पक्षपातः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७३

व्यासः कुले कुत्र जनिं प्रपेदे वर्णे च कस्मिन्विदुरस्य जन्म ।
कर्णो यशस्वी किल कुत्र जातः वंशे वशिष्ठः क्व नु लब्धसत्तः ॥
वाल्मीकिरासीत्कतमान्वयाये किंजातिरासीत्स गुहोऽनवद्यः ।
कश्चान्वयः श्रीशुकजन्मपूतः क्व वा शबर्या जननं बभूव ॥
आसीत्पवित्रः प्रभवः क एषां दयावतां ते न कुलं न लिङ्गम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७४

स्याद्वर्णहीनो वसुधातलेऽस्मिन् आचारवान्नापि भवेन्मनुष्यः ।
धनेऽतिलोभान्न ददीत काचं अशिक्षणात्स्याच्च निरक्षरास्यः ॥
भवेत्कृतघ्नस्सुजनैर्विगीतः शुण्ठोपि वा लोचनदुःखदायी ।
नीचोऽपि वा स्यादयशोनिधानं अकिञ्चनज्ञः पशुसन्निभो वा ॥
त्वद्भक्तियोगैकपरायणश्चेत् अनिन्द्यता चास्य भवेच्च मुक्तिः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७५

मत्तेभकुम्भोत्पतनोचितः किं सिंहः स्पृशेन्मूषिकमल्पकायम् ।
किं बालचूतप्रसवोपभोजी पिको दशेदर्कदलं स्वचंच्वा ॥
मधुव्रतोऽम्भोजमरन्दपायी पलंकषायाः किमुपैति पुष्पम् ।
रसालसुस्वादुफलाभिकाङ्क्षी शुकः किमुन्मत्तफले स्पृहावान् ॥

अभ्यस्तगानस्तवकीर्तनानां किं गातुमिच्छेत्परकीयकीर्तिम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७६

त्वत्पादपद्मद्वितयेऽहमीशे न निश्चलं स्थापयितुं स्वचेतः ।
स्थिरं तदापादयितुं प्रसीद गोपाय गोप्यं तमिमं च दासम् ॥
सरोजनेत्रास्म्यतिमात्रमज्ञः त्वद्दर्शनं शिक्षय मां विधातुम् ।
मातात्मनस्स्तन्यमिवात्मजाय भक्ताय मे भक्तिपयः प्रदाय ॥
प्रेम्णा च पुष्णन् परिवर्धयेमं स्थानं परं प्रापय दासलोके ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७७

अनाप्नुवंस्त्वन्मुखपद्मसाम्यं पद्मारिरासीत्सकलङ्क एव ।
त्वदक्षियुग्मेन तुलामगच्छत् अम्भोजजातं सलिले निलीनम् ॥
त्वत्कण्ठसौभाग्यभृतो निराशः आक्रोशदुच्चैस्स्वरतो हि शङ्खः ।
त्वदीयसौन्दर्यपराजितस्सन् बभूव सूनुस्तव सूनबाणः ॥
पद्मालया त्वय्यनुरक्तचेताः देवी तवासीदवियोगसिद्ध्यै ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७८

अनिन्दको यो हरिदासकोटेः स सर्वशास्त्रेषु भवेदधीती ।
यो वारयेन्नान्यजनाय दानम् स्वयं प्रदातेव विराजते सः ॥
न वञ्चयेद्यः पुरुषाननिन्द्यान् सत्कारकारीव विचिन्त्यते सः ।
देवालयक्षेत्रहृतेरहेतुः सौवर्णदेवालयकर्तृतुल्यः ॥
अनन्यवर्षाशननाशकारी स्याद्धर्मशालासुविधातृकीर्तिः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ७९

भुञ्जीय भोगानिह लोकगान्कि कायस्य भोक्तुः स्थिरता न दृष्टा ।
न यावदायुः पटुतात्र लोके स्यादेकरूपास्य कलेबरस्य ॥
शिशुत्वकौमारजरातटाकत्रये निमग्नं भवनं हि देहम् ।
संरक्षितुं तत्प्रयतामहे किं न मृत्युना तद्ग्रसनं निवार्यम् ॥
न श्रद्दधे नाटकरूपमेतत् न जन्मवाञ्छा मम पालयातः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८०

समीहते त्वद्भजनं मुखं मे जिह्वा चिकीर्षुः तव कीर्तनानि ।
त्वदर्चनं वांछति हस्तयुग्मं शुश्रूषते कर्णयुगं कथास्ते ॥
सेवां तवैवेप्सति मे शरीरम् दिदृक्षते त्वां मम नेत्रयुग्मम् ।
शिरस्त्वदङ्घ्रिप्रणिपातमिच्छत्यहं त्वदीयोऽस्मि न चान्यदीयः ॥
स्वप्ने प्रबोधेऽपि सदा मदीयम् चित्तं तवैवाङ्घ्रियुगे विलग्नम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८१

स्वयं परं प्राप्यत इत्यसाधुः अहंकृतिर्गर्वभरस्य योनिः ।
मदोऽस्मदीयो नयने पिधाय मुखेहि कामातिशयान्न माति ॥
ब्रह्माप्यनिर्माय सुवर्णतोऽस्मान् दौर्गत्यमापादयदेव नूनम् ।
त्वगस्थिभिः तुच्छतमैर्विगर्ह्यैः प्रपूर्यशुद्धानि पिधाय सृष्टान् ॥
कायानिमान्नाशवतोऽविदित्वा नेक्षामहे कामितया भवन्तम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८२

*गरुडवाहन दिव्यकौस्तुभालङ्कार रविकोटितेज सारङ्गवदन ।
मणिगणान्वितहेममकुटाभरण चारुमकरकुण्डल लसन्मन्दहास ॥

---

*संस्कृतमयमिदं पद्यं यथामूलं विनिवेशितम् ।

काञ्चनाम्बर रत्नकाञ्चीविभूषित सुरवरार्चित चन्द्रसूर्यनयन ।
कमलनाभ मुकुन्द गङ्गाधरस्तुत राक्षसान्तक नागराजशयन ॥
पतितपावन लक्ष्मीश ब्रह्मजनक भक्तवत्सल सर्वेश परमपुरुष ।
भूषणविकास श्रीधर्मपुरनिवास दुष्टसंहार नरसिंह दुरितदूर ॥ ८३

आसीः कथं त्वं दशरूपधारी किमेकरूपं भवतो दुरापम् ।
कुतः पयस्सागरमध्यगस्त्वं किं नास्ति ते वा मणिहेमहर्म्यम् ॥
भुजङ्गराजं कथमध्यशेथाः मञ्चा न किं ते मृदुतल्पयुक्ताः ।
गरुत्मता वाहनवान् कुतस्त्वं नान्दोलिकाः नाश्वगजं च किं ते ॥
निस्सीमसौभाग्य वदेदृशास्ते भोगास्स्वबुद्ध्या परिकल्पिताः किम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८४

श्रीवेङ्कटं यद्यगमिष्यमद्रिं नादास्यदन्नं किमु वेङ्कटेशः ।
यद्वाप्ययास्यं पुरुषोत्तमं चेत् भृतिर्जगन्नाथत एव मे स्यात् ॥
श्रीरङ्गपुण्यस्थलमीक्षितं चेत् प्रवर्धयेन्मां मुदितस्स देवः ।
उपागमं चेत्सुपवित्रकाञ्चीं संपोषयेन्मां वरदस्स देवः ॥
क्षेत्रान्तराणां परिवर्जनेन त्वद्धाम्नि तिष्ठामि न चाद्रियेऽहम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८५

महावदान्यं प्रविचिन्तयंस्त्वाम् उपागतो याचितुमेव यत्नात् ।
बहूनुपायानहमन्वतिष्ठं परस्सहस्रान्प्रविधार्य वेषान् ॥
विद्यास्वनेकास्वहमात्मशक्तिं प्रदर्शयन् रञ्जयितुं प्रवृत्तः ।
प्रीतोऽसि चेदर्थितमेव दत्त्वा विधेहि मां त्वं समवाप्तकामम् ॥

तुष्टोऽथ न स्याः मम विद्यया त्वं न त्वां गमिष्यामि गृहीतवेषः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८६

विशङ्कमानो मयि दुष्टतां किं स्वप्नेऽपि मे दृष्टिपथं न यासि ।
साक्षात्कृतिस्ते सकलस्य मास्तु भात्यद्य मे चेतसि कोऽप्युपायः ॥
आदाय किञ्चिद्दृढदारु तष्ट्वा त्वद्रूपतः स्थापितमेव मेऽग्रे ।
प्रदाय दीपागरुधूपगन्धान् संपूज्य पुष्पैः तुलसीदलैश्च ॥
आराधये त्वां मधुरान्नभोगैः अलं ममेदं हृदि दर्शनं ते ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८७

*भुवनेश गोविन्द रविकोटिसंङ्काश पक्षिवाहन भक्तपारिजात ।
अम्भोजभवरुद्रजम्भारिसन्नुत सामगानविलोल सारसाक्ष ॥
वनधिगम्भीर श्रीवत्सकौस्तुभवक्ष शङ्खचक्रगदासिशार्ङ्गहस्त ।
दीनरक्षक वासुदेव दैत्यविनाश नारदार्चित दिव्यनागशयन ॥
चारुनवरत्नकुण्डलश्रवणयुगल विबुधवन्दितपादाब्ज विश्वरूप ।
भूषणविकास श्रीधर्मपुरनिवास दुष्टसंहार नरसिंह दुरितदूर ॥ ८८

नागेन्द्रशायिन्! तव नाममन्त्ररुचिं विजानाति ललाटनेत्रः ।
बलप्रतापौ तव पङ्कजाक्ष! वाग्देवताजानिरवैति वेधाः ॥
मायां त्वदीयां मधुकैटभारे! दैत्याधिराजो बलिरेव वेत्ति ।
त्वत्पक्षपातं सकलान्तरात्मन्! अलं विबोद्धुं स सहस्रनेत्रः ॥
विचित्रवृत्तान्तविदो ह्यमी ते नरेषु नैवंविधता कदापि ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ८९

---

*संस्कृतमयमिदं मूलपद्यम् ।

वनीपकान्वारयितुं ध्रुवं स्वं क्षीराम्बुधिं प्रापयसि स्म दुर्गम् ।
भृत्योपरोधस्य निवारणाय त्वमध्यशेथाः भयदं महाहिम् ॥
"मा चानुगान्मां निजभक्तवृन्दं" इत्युत्पतन्तं खगमध्यरोहः ।
दासैरनिच्छन्निजमन्दिरासिं त्वं द्वारपालानकृथाः सुयोधान् ॥
मयोन्नतस्त्वं कथमीक्षणीयो नीचेन तात श्रितपारिजात ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहातांहो नरसिंहदेव ॥ ९०

स्वकर्णसङ्गाद्भवतः कथानां रोमाञ्चितं यस्य शरीरमास्ते ।
त्वद्दिव्यनाम्नः परिकीर्तनेन यो विस्मरेदात्मन एव देहम् ॥
यः कालदेशेन नमंस्त्वदङ्घ्री न वेत्ति वेद्यान्तरमेव किञ्चित् ।
यो राम! पद्माक्ष! हरे! नृसिंहेत्यनारतं क्रोशति मुक्तकण्ठम् ॥
यः स्थापयेत्त्वां निजमानसाब्जे स एव गच्छेत्परमं पदं ते ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९१

आतर्पणात्ते निगमान्तवेद्य! नाभ्यर्चितुं त्वामहमस्मि शक्तः ।
भूषा यथाशक्ति किमर्पयेयम् आसीस्ततः प्राग्धृतकौस्तुभस्त्वम् ॥
किं तोषयेयं बहुभक्ष्यभोज्यैः सुधां सुरेभ्योऽपि भवान्व्यतारीत् ।
समर्पयेयं किमुपायनानि लक्ष्मीर्हि साक्षात्तव धर्मदाराः ॥
भवान्समृद्धः सकलेश्वरश्च कियानहं तर्पयितुं स्वदत्तैः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९२

स्पत्यग्रपद्माक्ष भवान्मदीयः सम्पोषकोऽसीति धृतिर्मयाप्ता ।
विश्वासवत्त्वात्त्वयि तात मे त्वं श्रेयो विधत्स्वाविरतं विधातः ॥

अहो न पश्यामि विभुं समं ते तच्छलाघ्यमास्ते तव दिव्यनाम ।
पुराकृतं मे प्रविनाश्य पापं समुद्वह न्यस्तभरं सदा माम् ॥
आनन्दमाप्नोति ममान्तरात्मा न शक्यते शोधयितुं तवर्णम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९३

नूनं स शेते फणिनां बिलेषु चरेत्स हिंस्राध्युषितप्रदेशान् ।
विशेत्स नक्रैर्भरितं तटाकं निर्माति गेहं सुरसिन्धुकूले ॥
न्यस्येत्कटं स क्रिमिकीर्णदेशे सच्छिद्रपात्रेषु पयोऽर्पयेत्सः ।
वित्तं स चोन्मत्तजनाय दद्यात् अन्तःकुटीरे ज्वलयेन्महाग्निम् ॥
यो बद्धसख्यः कुजनेन साकं भक्तस्त्वदीयः विरसान्तगामी ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९४

मुरारिसंहार नमोऽस्तु चक्रिन् पद्मालयाधीश्वर वन्दनं ते ।
दीनार्तसन्त्राण नमांसि ते स्युः पद्माक्ष नित्यं शरणं मम त्वम् ॥
इन्द्रार्चित ! श्यामतनो ! शुभं ते सन्मङ्गलं ते धृतमन्दरास्तु ।
शार्ङ्गिन् ! शिवं स्यात्तव कम्बुकण्ठ ! दीनाभिरक्षिन् ! विजयस्तवास्तु ॥
समस्तभाग्यास्पद ! सार्वभौम ! कल्याणभाजी भव देव शश्वत् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९५

त्वं मत्स्यरूपो जलधिं प्रविश्य तं सोमकं तत्र सुखेन हत्वा ।
संरक्ष्य वेदान्सुरभूसुरेभ्यः प्रियं चिकीर्षुः परमं ददाथ ॥
भवद्वितीर्णैः निगमैः द्विजातेः आचारनिष्ठा सुकरा बभूव ।
अशेषपापं च विनश्यतीति विज्ञाततत्त्वा भवतो ब्रुवन्ति ॥

येऽनन्तकल्याणगुणान् विदुस्ते निःश्रेयसं हस्तगतं हि तेषाम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९६

त्वं कूर्मरूपेण महीधराघो यथेष्टमासीः जगदुद्दिधीर्षुः ।
वराहरूपान्तरमाश्रितस्त्वं हिरण्यनेत्रं हतवान् वनस्थः ॥
नृसिंहमूर्तिः पुरुषाशनं त्वं हिरण्यपूर्वं कशिपुं जघन्थ ।
चक्रे भवान्वामनरूपधारी पदे तृतीये बलिगर्वभङ्गम् ॥
कः शक्नुयात्कर्तुमिहेदृशानि विना भवन्तं सकलेशितारम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९७

अनन्तकल्याणगुणांस्त्वदीयानुन्मत्त एवास्मि कदाप्यशृण्वन् ।
दोषान्मदीयान्प्रशमय्य गाढान् त्रायस्व मां दुर्गतमार्तपाल ॥
अहं भवन्तं शरणं प्रपन्नः देवान्तरं मे न कदापि सेव्यम् ।
त्राणेऽपि बाधेऽपि भवान्समर्थः त्वत्पादपद्मे शरणं मदीयम् ॥
निस्सीमकारुण्यनिधे त्वदीयपादाब्जभक्तिं वितराद्य मे त्वम् ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९८

ब्रह्मेशशक्रार्चितपादपद्म त्वदाश्रितानामपवर्ग आसीत् ।
त्वदाश्रयोऽहं त्वयि सक्तचित्तः निःश्रेयसेनानुगृहाण दासम् ॥
त्रायस्व मां त्वं कृतिनं कुरुष्व तवैकदासं च विधेहि शीघ्रम् ।
संरक्षितश्चेत्तव किंकरत्वे स्थितः सपर्या विविधाः करिष्ये ॥
इत्थं भवन्तं बहुशोऽर्थयेऽहं प्रादुर्भवन् प्रीणय लोचने मे ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ ९९

शेषप्पनाम्ना कविना कृतानि पद्यानि कर्णेष्वमृतं स्रवन्ति ।
जनो य एतच्छतकं शृणोति भक्त्योपपन्नः चरितार्थ एषः ॥

लिखेच्च वा पद्यततिं य एनां नृसिंहकारुण्यपदं भवेत्सः ।
यः पूजयेद्ग्रन्थमिमं सभक्ति प्रनष्टपाप्मा स भवेत्कृतार्थः ॥

पुण्याकरं ग्रन्थमिमं विचिन्त्य पठेत्सदा यो भविता स मुक्तः ।
श्रीरम्यधर्माख्यपुराधिदेव रंहोहतांहो नरसिंहदेव ॥ १००

यन्नामानः पितामाता पितुश्चापि पितामहः ।
पुत्रः पौत्री कलाशाला गुरूणां त्रितयं च मे ॥
सोऽयं सर्वस्य सर्वस्वं नृसिंहो यत्र कीर्तितः ।
शतकं वरदार्येण मया तत्संस्कृतीकृतम् ॥

Library IIAS, Shimla
S 891.482.V 42 S
00032328